Barcode : 99999990067327
Title -
Author -
Language - sanskrit
Pages - 264
Publication Year - 1883
Barcode EAN.UCC-13



HUKOUMUDI BYAKARANAM.

BY

BARADA RÁJA.

लघुकौमुदी व्याकरणम् ।

वीवरदराजेन विरचितम् ।

CALCUTTA:

PRINTED BY P. M. SOOR & Co.

AT THE CROWN PRESS, 14 DUFF STREET.


PUBLISHED BY BHUVANA CHANDRA VASA´KA.

No. 8. NIMTOLLAH GHA´T STREET.

1883

Price 8 Annas.

लघुकौमुदी व्याकरणम् ।



श्रीवरदराजेन विरचितम् ।



श्रीयुत भुवनचन्द्रवसाकेन प्रकाशितम् ।



द्वितीयवारं मुद्रितम् ।



सम्वत् १९४१ ।



PRINTED BY P. M. SOOR & CO.,
AT THE CROWN PRESS, 14, DUFF STREET.

सूचीपत्रम् ।

संज्ञाप्रकरणम्	... ...	पृष्ठा १
अच्सन्धिः	... ...	५
हल्सन्धिः	... ...	१३
विसर्गसन्धिः	... ...	२०
अजन्तपुंलिङ्गाः	... ...	२२
अजन्तस्त्रीलिङ्गाः	... ...	१४
अजन्तनपुंसकलिङ्गाः	... ...	४५
हलन्त पुंलिङ्गाः	... ...	४८
हलन्त स्त्रीलिङ्गाः	... ...	६८
हलन्तनपुंसकलिङ्गाः	... ...	७०
अव्ययानि	... ...	७२
अवादयः	... ...	७४
अदादयः	... ...	१०१
जुहोत्यादयः	... ...	१२३
दिवादयः	... ...	१२८
स्वादयः	... ...	१३४
तुदादयः	... ...	१३६
रुधादयः	... ...	१४३
तनादयः	... ...	१४६
क्र्यादयः	... ...	१४८

चुरादयः १५२

स्वनन्ताः १५५

यङन्ताः १५७

यङ्लुगन्ताः १५८

नामधातवः १६०

कण्ड्वादयः १६२

आत्मनेपदम् १६३

परस्मैपदम् १६५

आनकर्म १६६

अकारादयः १६८

कृदन्ताः १७१

णकारम् १८१

समासः प्रस्तावः १८५

अव्ययीभावः १८६

तत्पुरुषः १८८

बहुव्रीहिः २०८

द्वन्द्वः २१२

तद्धिताः २१४

स्त्रीप्रत्ययाः २५३

इति सूचीपत्रम् ।

लघुकौमुदी व्याकरणम् ।

संज्ञाप्रकरणम् ।

अइउण् । ऋऌक् । एओङ् । ऐऔच् ।
हयवरट् । लण् । ञमङणनम् । झभञ् ।
घढधष् । जबगडदश् । खफछठथ चट-
तव् । कपय् । शषसर् । हल् ॥

इति माहेश्वराणि सूत्राणि अणादि-
संज्ञार्थानि ॥

= एषामन्त्या इतः । हकारादिष्वकार उच्चा-
रणार्थः । लण् मध्ये त्वित्संज्ञकः ॥

हलन्त्यम् । १ । ३ । ३ ॥

उपदेशेऽन्त्यं हलित्स्यात् । उपदेशे आद्यो-
च्चारणम् । सूत्रेष्वदृष्टम्पदं सूत्रान्तरादनुवर्त्तनीयं
सर्व्वत्र ॥

अदर्शनं लोपः। १। १। ६० ॥

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ॥

तस्य लोपः। १। ३। ९ ॥

तस्येतो लोपः स्यात्। णादयोऽण्याद्यर्थाः ॥

आदिरन्त्येन सहेता। १। १। ७१ ॥

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। यथाऽणिति अ इ उ वर्णानां संज्ञा एवमच् हलित्यादयः ॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः। १। २। २७ ॥

ऊश्च ऊच ऊ३श्च वः। वाङ्काल इव कालो यस्य सोऽच् कालात् झ्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येक-मुदात्तादिभेदेन त्रिधा ॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः। १। २। २७ ॥

ओ३चैदनुदात्तः। १। २। ३० ॥

समाहारः स्वरितः। १। २। ३१ ॥

स नवविधोऽपि प्रत्येक मनुनासिको नानुनासिकत्वाभ्यां द्विधा ॥

मुखनासिकावचनोऽनुनासिकः। १। १। ८ ॥

मुखसहितनासिकयोच्चार्य्यमाणो वर्णोऽनुनासिक-संज्ञः स्यात् । तदित्यम् । अ इ ऊ ऋ ऌ एषा-मष्टादशानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश तस्य दीर्घाऽभावात् । एचामपि द्वादश तेषां ह्रस्वा भावात् ॥

तुल्यास्यप्रयत्नं सवर्णम् ।१।१।९॥

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं मिथः सवर्णसंज्ञं स्यात् ॥

ऋटवर्णयोर्मिथः सावर्ण्यवाच्यम् ॥

अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानान्दन्ताः । उपूपध्मानीयानामोष्टौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ॥

यत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यः पञ्चधा । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानां । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्या-

ऽवर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायान्तु विवृत-
मेव। वाच्यस्त्वेकादशधा। विवारः संवारः श्वासो
नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तो
ऽनुदात्तः स्वरितश्चेति। खरो विवारः श्वासा अघो-
षाश्च। हशः संवारा नादाः घोषाश्च। वर्गाणाम्प्रथम-
तृतीय पञ्चमा यणश्चाऽल्पप्राणाः। वर्गाणां द्वितीय-
चतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः
स्पर्शाः। यणोऽन्तस्थाः। शल ऊष्माणः। अचः
स्वराः।)(क)(ख इति कखाभ्यां प्रागर्द्धविसर्ग-
सदृशो जिह्वामूलीयः।)(प)(फ इति पफाभ्यां
प्रागर्द्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः
परावनुस्वारविसर्गौ॥

अणुदित्सवर्णस्य चाप्रत्ययः। ११। ६८॥

अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्।
अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते
उदितः। तदेवम् इत्यष्टादशानां संज्ञा। तथे-
कारोकारौ। ऋकारस्त्रिंशतः। एवं ऌकारोऽपि।
एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन
यवला द्विधा। तेना ऽनुनासिकास्ते द्वयोर्द्वयो-
स्संज्ञा॥

परः सन्निकर्षः संहिता ।१।१।१०९॥

वर्णानामतिशयितसन्निधिस्संहिता संज्ञः स्यात् ।

हलोऽनन्तराः संयोगः ।१।१।७॥

अज्भिरव्यवहिता हलस्संयोगसंज्ञाः स्युः ।

सुपिङन्तम्पदम् ।१।४।१४॥

सुबन्तन्तिङन्तञ्च पदसंज्ञं स्यात् ॥

इति संज्ञाप्रकरणम् ॥

अचसन्धिः ॥

इको यणचि । ६ । १ । ७७ ॥

इकः स्थाने यण् स्यादचि संहितायां विषये ।

सुधी उपास्य इति स्थिते ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ।१।१।६६॥

सप्तमीनिर्देशेन विधीयमानङ्कार्यं वर्णान्तरेणा व्यवहितस्य पूर्वस्य बोध्यम् ॥

स्थाने ऽन्तरतमः । १ । १ । ४९० ॥

प्रसङ्गे सति सदृशतम आदेशः स्यात् । सु

य् उपास्य इति जाते ॥

अनचि च । ८ । ४ । ४७ ॥

अचः परस्य यरो द्वे वा स्तो नत्वचि ॥

झलाञ्झशोऽन्ते । ८ । ४ । ५३ ॥

स्पष्टम् । इति घकारस्य दकारः ॥

संयोगान्तस्य लोपः । ८ । २ । २३ ॥

संयोगाण्डं यत्पदन्तदन्तस्य लोपः स्यात् ॥

अलोऽन्त्यस्य । १ । १ । ५२ ॥

षष्ठीनिर्दिष्टान्त्यस्यादेशः स्यात् । इति प्राप्ते ॥

यणः प्रतिषेधो वाच्यः । सुड्व्युपास्यः । मद्धरिः ।

धात्वंशः । लाकृतिः ॥

एचोऽयवायवः । ६ । १ । ७८ ॥

एचः क्रमादय् अव् आय् आव् एते स्युरचि ॥

यथासंख्यमनुदेशः समानम् । १ । ३ । १० ॥

समसम्बन्धी निर्दिष्टो यथा संख्यं स्यात् । हरये ।

विष्णवे । नायकः । पावकः ॥ गोपयसोर्यत् ।

वान्तो यि प्रत्यये । ६ । १ । ७९ ॥

यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः । गव्यम् । नाव्यम् ॥

अध्वपरिमाणे च । गव्यूतिः ॥

अदेङ्गुणः । १ । १ । २ ॥

अत् एङ्च गुणसंज्ञः स्यात् ॥

तपरस्तत्कालस्य । १ । १ ।३० ॥

तः परो यस्मात्सच तात्परश्चोच्चार्य्यमाणः सस्वकालस्यैव संज्ञा स्यात् ॥

आङ्गुणः । ६ । १ । ८३ ॥

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् । उपेन्द्रः । गङ्गोदकम् ॥

उपदेशेऽजनुनासिक इत् ।१।३।२॥

उपदेशेऽजनुनासिकोऽदित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण् स्वतन्त्रस्या ऽवर्णेन सहोच्चार्य्यमाणोरेफोरलयोः संज्ञा ॥

उरण् रपरः । १ । १ । ५१ ॥

ऋ इति लिंशतः संज्ञेत्युक्तन्तत्स्थाने यो ऽण् स रपरः सन्नेव प्रवर्त्तते । कृष्णर्द्धिः तवल्कारः ।

लोप शाकल्यस्य ।८ । ३ । १९ ॥

अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे ॥

पूर्वत्रासिद्धम् । ८ । २ । १ ॥

उपाद्यध्यायोऽति त्रिपाद्यसिद्धा त्रिपाद्या-मपिपूर्वम्मतिपरं शास्त्रमसिद्धम् । हर इह । हर-यिह । विष्णुइह । विष्णविह ॥

वृद्धिरादैच् । १ । १ ॥

आदैच वृद्धिसंज्ञः स्यात् ॥

वृद्धिरेचि । ६ । १ । ८८ ॥

आदेचि परे वृद्धिरेकादेशः स्यात् । गुणाऽप-वादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्य्यम् । कृष्णौ-त्कण्ठ्यम् ॥

एत्येधत्यूठ्सु । ६ । १ । ८९ ॥

अवर्णादेजाद्योरेत्ये धत्योरूठि च परे वृद्धिरेका-देशः स्यात् । उपैति । उपैधते । प्रष्टौहः । एजाद्योः किम् । उपेतः । मां अवान् प्रेदिवत् ॥

अचादूङ्ङ्याम्युपसंख्यानम् । अक्षौहिणी सेना ॥

प्रादूहोढोढ्येषैष्येषु । प्रौहः । प्रौढः । प्रौढि । प्रष्ठः । प्रैष्यः ।

ऋतेच तृतीयासमासे । सुखेन ऋतः सुखार्त्तः । तृतीयेति किम् । परमर्त्तः ।

प्रवत्सतरकम्बलवसनार्णदशानाम्ऋणे । प्रार्णन् । वत्सतरार्णम् । इत्यादि ।

उपसर्गाः क्रियायोगे । १ । ४ । ५९ ॥

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्यु ॥

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः ॥

भूवाद्यो धातवः । १ । ३ । १ ॥

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

उपसर्गादति धातौ । ६ । १ । ९१ ॥

अवर्णान्तादुपसर्गाद्दकादौ धातौ परे दघ्निरेकादेशः स्यात् । प्रार्च्छति ।

एङि पररूपम् । ६ । १ । ९४ ॥

आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ॥

अचो ञ्णिति ।७।२।११५॥

अचामाद्ये यो ञ्णित्सु स आदिर्यस्य तद्वृद्धिसंज्ञं स्यात् ॥

शकन्ध्वादिषु पररूपं वाच्यम् । तच्चटेः । शकन्धुः । कर्कन्धुः । मनीषा । लाङ्गलीषा । आकृतिगणोऽयम् ॥ मार्तण्डः ।

ओमाङोश्च ।६।१।९५॥

ओमि आङि चात्पररूपमेकादेशः स्यात् । शिवायोन्नमः । शिवेहि ॥

अकःसवर्णे दीर्घः ।६।१।१०१॥

अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतृकारः ॥

एङः पदान्तादति ।६।१।१०९॥

पदान्तादेङो ऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ॥

सर्वत्र विभाषा गोः ।६।१।१२२॥

लोके वेदेचैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते । गो अग्रम् । गोग्रम् । एङन्तस्य किम् । चित्रव्वग्रम् । पदान्ते किम् । गोः ॥

अनेकाल् शित् सर्वस्य ।१।१।५५॥ इति प्राप्ते ॥ ङिच्च ।१।१।५३॥

ङिदनेकालप्यन्त्यस्यैव स्यात् ॥

अवङ् स्फोटायनस्य । ६ । १ । १२३ ॥

पदान्ते एङन्तस्य गोरवङ् वाचि । गोऽग्रम् । गवाग्रम् । पदान्ते किम् । गवि ॥

इन्द्रेच । ६ । १ । १२४ ॥

गोरवङ् स्यादिन्द्रे । गवेन्द्रः ॥

दूराद्धूतेच । ८ । २८४ ॥

दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा ॥

प्लुतप्रगृह्या अचि नित्यम् । ९ । १ । १२५ ॥

एते ऽचि प्रकृत्या स्युः । आगच्छ कृष्ण ३ अत्र गौश्चरति ।

ईदूदेद्विवचनं प्रगृह्यम् । १ । १ । ११ ॥

ईदूदेदन्तं द्विवचनमप्रगृह्यं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू ॥

अदसो सात् । १ । १ । १२ ॥

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । असी ईशाः । रामकृष्णावस्य आसाते । मात्किम् । असुकोऽत्र ॥

चादयोऽसत्वे । १ । ४ । ५७ ॥

अद्रव्यार्थाश्चादयो निपाताः स्युः ॥

प्रोदयः । १ । ४ । ५८ ॥

एतेऽपि तथा ॥

निपात एकाजनाङ् । १ । १ । १४ ॥

एकोऽच् निपात आङ्वर्ज्यः प्रगृह्यः । द्व इन्द्रः । च उमेशः । वाक्यस्मरणयोरङित् । आ एवन्नु मन्यसे । आ एवङ्किल तत् । अन्यत्र ङित् । द्वि-दुष्यल् । चोष्यल् ।

ओत् । १ । १ । १५ ॥

ओदन्तो निपातः । प्रगृह्यः । अहो ईशाः ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे । १ । १ । १६ ॥

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ । परे । विष्णो इति । विष्णविति ।

अय उञो वो वा । ८ । ३ । ३३ ॥

मयः परस्य ञ्ञो वो वा अचि। किम्नुक्तम्। किम्नु चक्तम्

इको ऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥

६ ॥ १ ॥ १२७ ॥

पदान्ता इको ह्रस्वो वा स्युरसवर्णेऽचि। ह्रस्वविधि सामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र चक्र्यत्र। पादान्ता इति किम् गौर्यौ ॥

अचो रहाभ्यां द्वे ॥ ८ ॥ ४ ॥ ४६ ॥

अचःपराभ्यां रेफहकाराभ्यामुत्तरस्य यरो द्वे वा स्तः गोर्य्यौ ॥ न समासे। वाप्यश्वः ॥

ऋत्यकः। ६। १। १२८ ॥

ऋति परे पदान्ता अकः प्रायेण वा। ब्रह्म ऋषिः। ब्रह्मर्षिः। पदान्ताः किम् आर्च्छत् ॥

इति स्वरसन्धिः ॥

हल्सन्धिः ॥

खोः शुना श्चुः। ८। ४। ४०॥

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकार-

चवर्गौ स्तः । रामःश्वेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ॥

ष्टुत्वम् । ८ । ४ । ४१ ॥

स्तोः ष्टुना योगेष्टुः । रामः षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्टौकसे ॥

ष्टुनाष्टुः । ८ । ४ । ४२ ॥

स्तोः ष्टुना योगेष्टुः । रामः षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्टौकसे ॥

पदान्तादिवोदात्तात् । ८ । ४ । ४३ ॥

पदान्ता द्युवर्णान्त्यस्याऽनाम: स्तोष्टुर्न स्यात् । ऽट्सन्तः । षट्ते । पदान्तात्किम् । ईड्ढे । टोः किम् । सर्पिष्टमम् ॥

अनाम्न वतिनगरीणामिति वाच्यम् । षण्णाम् । षण्णवतिः । षण्णगर्व्यः ॥

तोः षि । ८ । ४ । ४४ ॥

नष्टुत्वम् । सन्षष्ठः ॥

झ ला ञ्जशोन्ते । ८ । २ । ६८ ॥

पदान्ते झलाञ्जशः स्युः । वागीशः ।

अरोऽनुनासिकेऽनुनासिको वा । ८ । ४ । ४५ ॥

यरः पदान्तस्याऽनुनासिके परेऽनुनासिको वास्यात् । एतन्मुरारिः । एतद्मुरारिः ॥

प्रत्ये आषायान्नित्यम् । तन्मात्रम् । चिन्मयम् ॥

तोर्लि । ८ । ४ । ६० ॥

परसवर्णः । तल्लयः । विद्वांल्लिखति । नल्या-नुनासिकोऽलः ॥

उदः स्थास्तम्भोः पूर्वस्य । ८ । ४ । ६१ ॥

उदःपरयोः । स्थास्तम्भोः । पूर्वसवर्णः ॥

तस्मादित्युत्तरस्य । १ । १ । ६७ ॥

पञ्चमीनिर्देशेन क्रियमाणकार्यं वर्णान्तरेणाऽव्यवहितस्य परस्यज्ञेयम् ।

आदेः परस्य । १ । १ । ५४ ॥

परस्य यदिहितं तत्तस्यादेर्वोध्यम् । इति सख्यः ।

झरो झरिसवर्णे । ८ । ४ । ६५ ॥

हलः परस्यझरो वालोपः सवर्णे झरि ॥

खरि च । ८ । ४ । ५५ ॥

खरिझलाश्चरः स्युः इत्युदोदस्यतः । उत्थानम् । उत्त्थानम् ॥

झयो होऽन्यतरस्याम्। ८। ४। ६२॥

झयः परस्य हस्य वा पूर्वसवर्णः। नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशोवर्ग चतुर्थः। वाग्घरिः। वाग्हरि॥

शश्छोऽटि। ८। ४। ६३॥

झयः परस्यशस्यछोवाऽटि। तदूशिव इत्यत्र दस्य चुत्वेन जकारेऽतीश्वरि चेति जकारस्य चकारः। तच्छिवः। तच् शिवः॥

ङमो ह्रस्वादचि ङमुण्नित्यम्। ८। ३। ३२॥

ङान्तस्य पदस्यानुस्वारो हलि। हरिंवन्दे॥

मोनुस्वारः। ८। ३। २३॥

मान्तस्य पदस्यानुस्वारो हलि। हरिंवन्दे॥

नश्चापदान्तस्य झलि। ८। ३। २४॥

नस्यमस्य चापदान्तस्य झल्यनुस्वारः। यशांसि आक्रंस्यते॥

अनुस्वारस्य ययि परसवर्णः।८।४।५८॥

यान्तः।

वापदान्तस्य। ८। ४। ५९॥

त्वङ्करोषि। त्वंकरोषि॥

मो राजिलसः कौ । ८ । ३ । २६ ॥

झिकन्तेराज तौ परे सलो मस्य म एव स्यात् ।

कन्नाट ॥

हे म परेवा । ८ । ३ । २६ ॥

वपरे हकारे परेमस्यमो वा । किम्ह्लयति । किंह्लयति ।

यवलपरेयवला वा । किंय्ह्यः । किंह्यः । किं वह्लयति । किंह्लयति किंल्ह्लादयति । किंह्लाद-यति ॥

नपरेनः । ८ । ३ । २७ ॥

नपरे हकारेसस्य नो । वा । किन्ह्नुते किंह्नुते ॥

डः सिधुट् । ८ । ३ । २९ ॥

डात्परस्य सस्यधुड्वा ।

आद्यन्तौ टकितौ । १ । १ । ४६ ॥ टित्किती

यस्योतौ तस्य क्रमादाद्यन्तौ स्तः । षट्सन्तः । षट्त्सन्तः ॥

ङ्णोः कुक्टुक् शरि । ८ । ३ । २८ ॥

वाक्तः । प्राङ्षष्टः प्राङ्ष्ठः । सुगाङ्षष्टः । सुगाट्षष्ठः ॥

लश्च । ८ । ३ । २० ॥

नान्तात्परस्य सस्यधुड्वा । सनल्सः । सन्सः ।

रिलुक् । ८ । ३ । २१ ॥

पदान्तस्य नस्य घे परे लुग्वा । सच्छम्भुः सच्छम्भुः । सच्च घम्भुः सच्च घम्भुः ।

ङमो ह्रस्वा दचिङमुट्नित्यम् । ८ । ३ । ३२ ।

ङस्वात्परो यो ङम् तदन्तं यत्पदन्तस्मात्परस्या चोङ्मुट् । प्रत्यङ्ङात्मा । खगसीङ्गः सन्नच्युतः ।

समः सुटि । ८ । ३ । ५ ॥

समोऽः सुटि ॥

अलानुनासिकः पूर्वस्य तु वा । ८ । ३ । ३ ॥

अत्र यमकारणोरोः पूर्वस्यानुनासिको वा ।

अनुनासिकात्परोऽनुस्वारः । ८ । ३ । ४ ॥

अनुनासिकविचायरोः पूर्वस्मात्परोऽनुस्वारागमः ।

खरवसानयोर्विसर्जनीयः । ८ । ३ । १५ ॥

खरिअवसाने च पदान्तस्य रस्य विसर्गः ।

सम्मुङ्गानां सोवक्तव्यः । संस्कर्त्ता संस्कर्त्ता ।

पुमः खय्यम्परे । ८ । ३ । ३५ ॥

अस्परे खयिपुमोरः । पुंस्कोकिलः पुंस्कोकिलः ।

नश्छव्य प्रशान् ॥ ८ ॥ ३ ॥ ७ ॥

अस्परे छविनान्तस्य पदस्यरः ननु प्रशान्-शब्दस्य ॥

विसर्ज्जनीयस्य सः । ८ । ३ । ७ ॥

खरि । चक्रिंस्त्रायस्व । चक्रिंस्त्रायस्व । अप्रशान् क्रिम् । प्रशान्तनोति । पदान्तस्येति । किन् । हन्ति ।

नॄन् पे । ८ । ३ । १० ॥

नॄनित्यस्यरुर्वा पे ॥

कूपोः ≍क≍पौच । ८ । ३ । ३७ ॥

कवर्गे पवर्गेच विसर्गस्य ≍क≍पौस्तः । चाह्विसर्गः । नॄंः पाहि । नॄंःपाहि । नॄं≍पाहि । नॄं≍पाहि नॄंन्याहि ।

तस्य परस्त्रेडितम् । ८ । १ । २ ॥

द्विरुक्तस्यपरमात्रे डितंस्यात् ॥

कान्त्रेडिते । ८ । ३ । १२ ॥

कान्तकारस्य स्वरात्रेडितो कांस्कान । कांस्कान ॥

छेच । ६ । १ । ७३ ॥

ऋस्य छेतुक् । शिवच्छाया ।

पदान्ता वा । ६ । १ । ७६ ॥

दीर्घात्पदान्ता च्छेतुक्वा लक्ष्मीच्छाया ।

इति हल्सन्धिः ।

विसर्गसन्धिः ॥

विसर्जनीयस्य सः । ८ । ३ । ३४ ॥

खरि । विष्णुस्त्राता ।

वा शरि । ८ । ६ । ३५ ॥

शरिविसर्गस्य विसर्गोवा । हरिःशेते हरिश्शेते ।

ससजुषोरुः । ८ । २ । ३६ ॥

पदान्तस्य सस्य सजुषश्च रुःस्यात् ।

अतोरोरप्लुता दप्लुते । ६ । १ । ११३ ॥

अप्लुतादतः परस्य रोपः स्याद प्लुतेति । शिवो-र्च्चः ।

हशिच । ६ । १ । ११२ ॥

तथा । शिवोवन्द्यः ।

भोभगो अघोअपूर्वस्य योऽशि ।८।३।१७॥

एतत्पूर्वस्यरोर्य्यादेशोऽशि । देवाइह । देवाअिह ।
ओस् अगोस् अघोस् इति सान्तानिपाताः तेषां रोर्य्यत्वे
कृते ॥

हशि सर्वेषाम् । ८ । ३ । २२ ॥

भोभगो अघो अपूर्वस्य यस्यलोपः स्याद्धशि ।
ओ देवाः । अगो नमस्ते । अघोयाहि ॥

रोऽसुपि । ८ । ३ । ६८ ॥

चक्रोरेफादेशो नतु सुपि । अहरहः । अह-
र्गणः ॥

रो रि । ८ । ३ । १४ ॥

रेफस्य रेफे परे लोपः ॥

हलोपे पूर्वस्यदीर्घोऽणः ।६।३।१११ ॥

ढ्रे फयेर्लोपे निमित्तपोः पूर्वस्याणोदीर्घः ।
पुनारभते । हरीरस्य श्मश्रू राजते । अणः किं ।
हृढः दृढः । मनस् रथ इत्यत्र सत्वे कृते हशिचेत्युत्वे
रोरी तिलोपे च प्राप्ते ॥

विप्रतिषेधे परं कार्य्यम् ।१॥४॥२ ॥

तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते पूर्वत्रासिद्धम् इति रोरीत्यस्यासिद्धत्वादुत्वमेव । ननोरयः ॥

एत तद्दोःसुलोपोऽकोरनञ्समासे हलि ॥ ६ ॥ १ ॥ १३१ ॥

अकारयोरेतत्तदोर्यः सुस्तस्य लोपोऽहलि नतु नञ् समासे । एषविष्णुः । सशब्भुः । अकोः किम् । एवको लट्रः । अनञ् समासे किम् । अस:शिवः । हलि किम् । एषोऽत्र

दोऽचि लोपे चेत्पादपूरणम् ॥६॥१॥१३८॥

स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येन पूर्य्येत् । सेनास विद्धि प्रस्थितम् । सैष दाशरथी-रामः ॥

इति विसर्गसन्धिः ।

अजन्तपुंल्लिङ्गाः ॥

अर्थवद्धातुरप्रत्ययःप्रातिपदिकम् । १ । २ । ४५ ॥

धातुं प्रत्ययप्रत्ययान्तञ्च वर्जयित्वा अर्थवच्छब्द-रूपम्प्रातिपदिकसंज्ञं स्यात् ॥

कृत्तद्धितसमासाश्च ।१॥ २ ॥ ४६ ॥

कृत्तद्धितान्तौ समासश्च तथा स्युः ॥

स्वौजसमौट् छष्टाभ्याम्भिस्ङेभ्याम्भ्यास्
ङसिभ्यांभ्यस्ङसोसाम्ङ्योःसुप् । ४ ॥ १ ॥ २ ॥

सुश्औ जस् इतिप्रथमा । अम्औट्शसइति द्वितीया ।
टाभ्यांभिस् इति तृतीया । ङेभ्याम् भ्यस् इति
चतुर्थी । ङसि भ्यां भ्यस् इनि पञ्चमी । ङस ओस्
आम् इति षष्ठी । ङि ओस् सुप इति सप्तमी ॥

ङ्याप् प्रातिपदिकात् । ४ ॥ १ ॥ १ ॥

प्रत्ययः ॥ ३ ॥ २ ॥ १ ॥

परश्च । २ ॥ १ ॥ २ ॥ इत्यधिकृत्य ॥

ङ्यन्तादावन्तात्प्रातिपदिकाच्च परेस्वादयः प्रत्यया
स्युः ॥

सुपः ॥ १ ॥ ४ ॥ १०२ ॥

सुप स्त्रीणि त्रीणि वचना न्येकश. एकवचन द्विव-
चनबहुवचन संज्ञानि स्युः ।

द्वे कयोर्द्विवचनैकवचने ।१॥४॥२२ ॥

द्विवैकत्वयोरेतेस्तः ।

वह्वृष् वह्ववचनम् । १ ॥ ४ ॥ २१ ॥

वह्वर्थविवक्षा यास्यद्वचनं स्यात् ॥

विरामो ऽवसानम् । १ ॥ ४ ॥ १९०॥

वर्णानाम् भावोऽवसानसंज्ञः स्यात् । स्वविसर्गौ रामः ॥

सरूपाणां ते कृशेऽनेकविभक्तौ ।१।२॥६४॥

एकविभक्तौयानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ।

प्रथमयोः पूर्वसवर्णः ॥ ६ ॥ १ ॥ १०२ ॥

अकः प्रथमाद्वितीययोरचि पूर्वसवर्णो दीर्घ एकादेशः स्यात् । इति प्राप्ते ।

वा ह्यचि ॥ ६ ॥ १ ॥ १०४ ॥

आदचि पूर्वः सवर्णदीर्घः । दध्विरेचि रामौ ।

वह्वृष् वह्ववचनम् ॥ १ ॥ ४ ॥ २१ ॥

चादु ॥ १ ॥ ३ ॥ ७ ॥

प्रत्ययादौ चादू धूतौ स्तः ॥

विभक्तिश्च ॥ १ ॥ ४ ॥ १०४ ॥

सुप्तिङौ विभक्ति संज्ञौ स्तः ॥

न विभक्तौ तुस्माः ॥ १ ॥ ३ ॥ ४ ॥

विभक्तिस्थास्तवर्गं सलानेतः । इति सस्यनेत्वम् ।

रामाः ॥

एकवचनं सम्बुद्धिः ॥ २ ॥ ३ ॥ ४९ ॥

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञंस्यात्

यस्मा त्प्रत्यय विधिस्तदादि प्रत्ययेऽङ्गम् । ४ ॥ १३१ ॥

यः प्रत्ययोयस्मात्क्रियते तदादिशब्दस्वरूप ग्रहणं तदङ्गं स्यात् ॥

एङ्ह्रस्वात सम्बुद्धेः ॥ ६ ॥ १ ॥ ६६ ॥

एङन्तादुभस्वन्ताच्चाङ्गाद्यल्लुप्यते सम्बुद्धेश्च ।

हेराम । हेरामौ । हेरामाः ॥

अमि पूर्वः ॥ ६ ॥ १ ॥१०७ ॥

अकोऽस्यचि पूर्वरूपमेकादेशः । रामम् ।

रामौ ॥

ङ याऽप्तृ तद्धिते ॥ १ ॥ ३ ॥ ८ ॥

तद्धितवर्ज्जंप्रत्ययाद्या ङश्च ञवर्गौ इत स्युः ॥

तस्मा च्छसो नः पुंसि ॥ ६ ॥ १ ॥१०३॥

पूर्वसवर्णदीर्घांत्परोयः शसस्तस्य नः स्यात्पुंसि ॥

अट कुपाङ्नु स्नम्नवा येऽपि ।८।४।२॥

अट्कवर्गः पवर्गश्चाङ् नुम् एतैर्व्यैस्तैर्यैर्घासञ्ज्ञव-
सितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः ।
समानपदे इति प्राप्ते ॥

मद्रान्तस्य । ८ । ४ । ३७ ॥

नस्यणो न । रामान् ॥

टाङसिङसा मिनात्स्याः ।७।१।१२॥

अदन्ताट्टादीनामिनादयः स्युः । णत्वम् । रामेण ॥

सुपि च । ७ । ३ । १०२ ॥

यजादौ सुपि अतोऽङ्ग स्यदीर्घः । रामाभ्याम् ॥

अतो भिस ऐस् । ७ । १ । ९ ॥

अनेकाल्शित्सर्वस्य । रामैः

ङेर्यः । ७ । १ । १३ ॥

अतोऽङ्गात्परस्य ङेर्य्यादेशः ॥

स्यानिवद्देशोऽनल्विधौ १।१।५८॥

आदेशः स्यानिवत्स्यान्नतु स्याच्चलाश्रयविधौ ।
इतिस्यानिवत्त्वात् सुपिचेति दीर्घः । रामाय ।
रामाभ्याम् ॥

बहुवचने झल्येत् । ७ । ३ । १०३ ॥

झलादौवङ्यचने सुप्यतोऽङ्गस्यैकारः । रामेभ्यः । सुपि किम् । पचध्वम् ॥

वा बसाने । ८ । ३ । ५६ ॥

अवसाने झलाञ्झशोवा । रामात् । रामाद् । रामाभ्याम् । रामेभ्यः । रामस्य ॥

ओसि च । ७ । ३ । १०४ ॥

अतोऽङ्गस्यैकारः । रामयोः ।

हृस्व नद्यापो नुट् । ७ । १ । ५४ ॥

ह्रस्वान्तान्नद्यन्तादावन्ताच्चाङ्गात्परस्यामोनुडागमः ॥

नामि । ६ । ४ । ३ ॥

अजन्ताङ्गस्य दीर्घः । रामाणाम् । रामयोः ।

एत्व कृत ॥

आदेशप्रत्यययोः । ८ । ३ । ५९ ॥

इण्कुभ्यामपरस्यापदान्तस्यादेशस्य प्रत्ययावयवस्य च यः सस्तस्य स्थाने ष्वादेशः । इण्निमित्तस्य सस्य ताद्दश एव षः । रामेषु । एवं कृष्णादयोऽप्य दन्ताः ॥

वाच्या इत्यर्थः । अन्तरे अन्तरा वा घाटकाः । परिधानीया इत्यर्थः ॥

पूर्वादिभ्यो नवभ्यो वा ।७।१।१६॥

एभ्यो ङसिङ्भ्यां स्मात् स्मिनौ वा स्तः ॥ पूर्व-स्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । एवं परा-दीनाम् । शेषं सर्ववत् ।

प्रथमचरमतया ऽल्पार्द्धकतिपयनेमाश्च ।

१।१।३३।

एते जसि उक्तसंज्ञा वा स्युः । प्रथमे । प्रथमाः तयः प्रत्ययः । द्वितये । द्वितयाः । शेषं राम-वत् । नेमे । नेमाः । शेषं सर्ववत् ।

तीयस्य ङित्सु वा । द्वितीयस्मै । द्वितीयाय इत्यादि । एवं तृतीयः । निर्ज्जरः ॥

जराया जरस्यन्यतरस्याम् ।७।२।१०१॥

अजादौ विभक्तौ । पदाङ्गाधिकारे तस्य तदन्तस्य च । निर्दिश्यमानस्यादेशा अवन्ति । एक-देश विकृतमनन्यवदिति जरशब्दस्य जरस् । निर्ज्ज-रसौ । निर्ज्जरस इत्यादि । पक्षे हलादौ च रामवत् । विश्वपाः ।

दीर्घाज्जसि च । ६ । १ । १०५ ॥

विश्वपौ । विश्वपाः । हे विश्वपाः । विश्वपाम् । विश्वपौ ।

शुङनपुंसकस्य । १ । १ । ४३ ॥

स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युर्क्लीवस्य ।

स्वादिष्व सर्वनामस्थाने । १ । ४ । १७ ॥

कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वस्यदं स्यात् ।

यचि भम् । १ । ४ । १८ ॥

यादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वभसंज्ञं स्यात् ॥

ञ्नाकडोरादेका संज्ञा । १ ॥ ४ ॥ १ ॥

इत ऊर्ध्वं कड़ाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या परा ऽनवकाशा च ॥

आतो धातोः । ६ । ४ ॥ १४० ॥

आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः । अलोऽन्त्यस्य । विश्वपः । विश्वपा । विश्वपाभ्यामित्यादि । एवं वंधञ्चवृत्रादयः । धातोः ।

क्सिम् । हाहान् । हरिः । हरी ॥

जसि च । ७ ॥ १०९ ॥

ह्रस्वान्तस्याङ्ग्स्य गुणः । हरयः ।

ह्रस्वस्य गुणः । ७ । ३ । १०८ ॥

सम्बुद्धौ । हे हरे । हरिम् । हरी । हरीन् ।

शेषो घ्यसखि । १ । ४ । ७ ॥

शेष इति खट्टार्थम् । ह्रस्वो यावित्तौ तदन्तं सखिवर्ज्जं घिसंज्ञम् ।

आङो नाऽस्त्रियाम् । ७ ॥ ३ ॥ १२० ॥

घेः परस्याङो ना स्यादस्त्रियाम् । आङिति टा संज्ञा । हरिणा । हरिभ्याम् । हरिभिः ॥

घेर्ङिति ॥ ७ ॥ ३ ॥ १११ ॥

घिसंज्ञस्य ङिति सुपि गुणः । हरये ।

ङसिङसोश्च ॥ ६ ॥ १ ॥ ११० ॥

एङो ङसिङोसवर्णपूर्वरूपसैकादेशः । हरेः । हर्योः । हरीणाम् ।

अच्च घेः ॥ ७ ॥ ३ ॥ ११९ ॥

इदुद्भ्यासुत्तरस्य ङेरौत् घेरत् । हरौ । हरिषु ।

एवं कव्यादयः ।

अलङ्सौ ॥ ७ ॥ १ ॥ ९३ ॥

सख्युरङ्स्यानङादेशो ऽसम्बुद्धौ सौ ।

अल्लोऽन्त्यात्पूर्व उपधा ॥१॥१॥६५॥

अन्त्यादलः पूर्वो यो वर्णः स उपधासंज्ञः ।

सर्वनामस्थाने चासम्बुद्धौ ॥ ६ ॥ ४ ॥ ८ ॥

नान्तस्योपधाया दीर्घो ऽसम्बुद्धौ सर्वनामस्थाने ।

अप्तृन्तृच एकाल् प्रत्ययः । १ । २ । ४१ ॥

हल् ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्

। ६ । १ । ६८ ॥

हलन्तात्परं दीर्घाद् यौ ङ्यापौ तदन्ताच्च परं

सुतिसीत्येतदपृक्तं हल्लुप्यते ।

नलोपः प्रातिपदिकान्तस्य ।८।२।७॥

प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः ।

सखा ।

सख्युरसम्बुद्धौ । ७ । १ । ९३ ॥

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं

ङित्वत्स्यात् ॥

अचो ञ्णिति । ७ । २ । १२५ ॥

अजन्ताङ्गस्य इद्धिर्ञिति णिति च परे । सखायौ । सखायः । हे सखे । सखायम् । सखायौ । सखीन् । सख्या । सख्ये ।

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥ ४ । १ । २ ॥

खितिशब्दाभ्यां खौतीशब्दाभ्यां कृतप्रत्यादेशाभ्यां परस्य ङसिङसोरत ऽः । क्षित्यै । क्षित्यौ ॥ ३ ॥ ११८ ॥

इतः परस्य ङेरौत् । क्षित्यौ । शेषं हरिवत् ॥

प्रतिपदमसु एव । १ ॥ ४ ॥ ८ ॥

विसंज्ञः । पत्ये । पत्युः २ । पत्यौ शेषं हरिवत् । समासे तु भूपतये । कतिशब्दो बहुवचनान्तः ।

बहुगणवतुडति संख्या ॥ १ ॥ १ ॥२३॥

डति च ॥ १ ॥ १ ॥ २५ ॥

डत्यन्ता संख्या षट संज्ञा स्यात् ।

षड्भ्यो लुक् । ७ । १ । २२ ॥

जश्शसोः ॥

प्रत्ययस्य लुक्श्लुपः । १ । १ ॥ ६१ ॥

लुक्श्लुप् शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ।

प्रत्ययलोपे प्रत्ययलक्षणम् । १ ॥ १ ।६२॥

प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् । इति जसि-
चेति गुणे प्राप्ते ।

न लुमताङ्गस्य। १ । १ । ६३ ॥

लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् ।
कति २ । कतिभिः । कतिभ्यः २ । कतीनाम् ।
कतिषु । युष्मदस्मद्भ्यट्संज्ञकास्त्रिषु सकृपाः । त्रि
शब्दो नित्यं बहुवचनान्तः । त्रयः । तीन् । तिभिः ।
तिभ्यः २ ।

बेस्त्रयः । ७ । १ । ५३ ॥

आनि । त्रयाणाम् । तिषु । गौणत्वे ऽपि ।
प्रियत्रयाणाम् ।

त्यदादीनामः । ७ । २ । १०२ ॥

एषामकारो विभक्तौ । द्विपर्यन्तानामेषेषिः । द्वौ ।
द्वौ । द्वाभ्याम् २ । द्वयोः २ । परि लोकमिति
परयोः क्रूर्यः ।

दीर्घाज्जसि च । ६ ॥ १ ॥ १०५ ॥

दीर्घाज्जसि इचि च परे न पूर्वसवर्णदीर्घः ।
पट्यौ । पट्यः । हेपटी । पटीम् । पटीन् ।

पप्या। पपीभ्याम्। पपीभिः। पप्ये। पपीभ्यः
पप्यः। पप्योः २। दीर्घत्वान्न द्युट्। पप्याम्।
ङौ तु सवर्णदीर्घः। पपौ। पपीषु। एवं वात-
प्रस्यादयः। वह्व्यः श्रेयस्यो यस्य स वह्व्यश्रेयसी।

यूस्त्र्याख्यौ नदी। १। ४। ३॥

ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथम लिङ्गग्रहणञ्च। पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्व वक्तव्यमित्यर्थः।

ञस्नाय्यनद्योर्ह्रस्वः। ७। ३। १०७॥

सम्बुद्धौ। हे वह्व्यश्रेयसि॥

आण् नद्याः। ७। ३। ११२॥

नद्यन्तात्परेषां ङितामाडागमः।

आटश्च। ६। १। ९०॥

आटो ऽचि परे वृद्धिरेकादेशः। श्रैयस्यैव।
वह्व्यश्रेयस्याः। वह्व्यश्रेयसीनाम।

ङेराम्नद्यामीभ्यः। ७। ३। ११६॥

अदन्तादवर्णान्नीशब्दात् परस्य ङेराम। वह्व्यश्रेयस्याम्। पपीवत्। अङ्गन्तत्वान्न लोपः॥ अतिलक्ष्मीः। पपीवद्वह्व्यश्रेयसीवत् मधीः।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ । ६ । ४ । ७७ ॥

श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रूदृत्यस्य चाङ्गस्येयङुवङौ स्तो ऽजादौ प्रत्यये परे । द्रुति प्राप्ते ॥

एरनेकाचो ऽसंयोगपूर्वस्य । ६ । ४ । ८२ ॥

धात्ववयवसंयोगपूर्वो न भवति य ईवर्णान्तो यो धातुस्तदन्तस्यानेकाचो ऽङ्गस्य यण्ऽजादौ प्रत्यये । प्रध्यौ । प्रध्यन् । प्रध्यौ । प्रध्यः । प्रध्यि । शेषं पपीवत् । एवं ग्रामण्यौ । स्त्रौ तु । ग्रामण्यान् । अनेकाचः किम् । नीः नियौ । नियः । अमि शसि च परत्वादियङ् । नियम् । नेरान् । नियाम् । असंयोगपूर्वस्य किम् । स्रुग्रियौ । यवक्रियौ ॥

गतिश्च । १ । ४ । ६० ॥

प्रादयः क्रियायोगे गतिसंज्ञाः स्युः । गतिकारकेतरपूर्वपदस्य यण् नेष्यते । भ्रुङ्खियौ ॥

न भूसुधियोः । ६ । ४ । ८५ ॥

एतयोरचि सुपि यण् न । सुधियौ । सुधिय

इत्यादि । सुखमिच्छतीति । सुखीः । सुतीः । सुख्यौ । सुत्यौ । सुख्युः । सुत्युः । शेषं प्रधीवत् शंभुर्हरिवत् । एवं आन्वादयः ॥

त्यज्वत्क्रोष्टुः । ७ । १ । ९५ ॥

असम्बुद्धौ सर्वनामस्थाने । क्रोष्टुशब्दस्य क्रोष्टु प्रयोक्तव्य इत्यर्थः ॥

ऋतो ङिसर्वनामस्थानयोः ।७।३।११०॥

ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते ॥

ऋदुशनस्पुरुदंशो ऽनेहसाञ्च न ।१।९॥

ऋदन्तानामुशनसादीनाञ्चानङ् स्यादम्बुद्धौ सौ ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् । ६ । ४ । ११ ॥

अवादीनामुसधाया दीर्घो ऽसम्बुद्धौ सर्वनामस्थाने । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टून् ।

विभाषा तृतीयादिष्वचि ।७।१।९७॥

अजादिषु क्रोष्टुर्वा त्यज्यत् ॥ क्रोष्ट्रा । क्रोष्ट्रे ॥

ऋत उत् । ६ । १ । १११ ॥

ऋतो ङसिङसोरति ऊदेकादेशो रपरः ॥

रात्सस्य । ८ । २ । २४ ॥

रेफात्संयोगान्तस्यैव लोपो नान्यस्य । रस्य विसर्गः । कोष्टुः । कोष्टोः ॥

नुसंचिरत्यच्चङ्भावेभ्यो नुट्पूर्वविप्रतिषेधेन ॥

कोष्टूनाम् । कोष्टरि । पक्षे हलादौ च शम्भुवत् । हृह्रुः । हृह्रौ । हृह्रूम् । इत्यादि । अतिचक्षुशब्दस्तु नदीकार्यं विशेषः । हे अतिचक्षु । अतिचक्षवौ । अतिचक्षवः । अतिचक्षुनाम् । खलपूः ॥

ओः सुपि । ६ । ४ । ८३ ॥

धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचो ऽङ्गस्य यण् स्यादचि सुपि । खलप्वौ । खलप्वः । एवं सुल्वादयः । स्वभूः । स्वभुवः । स्वभुवौ । वर्षाभूः ॥

वर्षाभूश्च । ६ । ४ । ८४ ॥

अस्य यण् स्यादचि सुपि । वर्षाभ्वावित्यादि । हन्भूः ॥

हल्ङ्यादिलोपः पूर्वस्य सुवो यण् वक्तव्यः ॥

हल्भ्यौ । एवङ्स्वः । धाता । हे धातः । धातारौ । धातारः ॥

ऋवर्णान्नस्य णत्वं वाच्यम् । धातृणाम् ॥

एवङ्नप्त्रादयः । नप्त्रादि ग्रहणं व्युत्पत्तिपक्षे स्त्रियर्थम् । तेनेह न । पिता । पितरौ । पितरः । पितरम् । श्वेषन्त्रातृवत् । एवङ्त्रासात्रादयः । त्रा । त्रौ ॥

नृच्च । ६ । ४ । ६ ॥

ऋस्य नामि वा दीर्घः । नृणाम् । नॄणाम् ॥

गोतो णित् । ७ । १ । ९० ॥

ओकारान्ताद्विहितं सर्वनामस्थानं णिद्वत् । गौः । गावौ । गावः ॥

औतोऽम्शसोः । ६ । १ । ९३ ॥

औतोऽम्शसोरचि आकार एकादेशः । गाम् । गावौ । गाः । गवा । गवे । गोः २ । इत्यादि ॥

रायो हलि । ७ । २ । ८५ ॥

अस्याकारादेशो हलि विभक्तौ । राः ।

रायौ । रायः । राभ्यामित्यादि । ग्लौ । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ॥

॥ इत्यजन्ताः पुंलिङ्गाः ॥

॥ अजन्तस्त्रीलिङ्गाः ॥

॥ रमा ॥

औङ आपः । ७ । १ । १८ ।

आपन्तादङ्गात्परस्यौङश्शी स्यात् । चौङित्त्वौकारविभक्तेः संज्ञा । रमे रमाः ॥

स्वमोर्नपुंसकात् । ७ । १ । २३ ॥

आप एकारः स्यात्स्वमोर्नपुंसकात् । एङ्ह्रस्वादितिह्रस्वसिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः ॥

आङि चापः । ७ । ३ । १०५ ॥

आङि ओसि चाप एकारः । रमया । रमाभ्याम् २ । रमाभिः ।

याडापः । ७ । ३ । ११३ ॥

आपो ङितो याट् । ह्रस्वः । रमायै । रमाभ्याम् २ ।

रमाया: २ । रमयो: । रमाणाम् । रमायाम् । रमासु । एवं दुर्गाम्बिकादय: ।

सर्वनाम्न: स्याड्ढ्रस्वश्च । ७ । ३ । ११४ ॥

आवन्तात्सर्वनाम्नो ङित: स्याडापश्च ह्रस्व: । सर्वस्यै । सर्वस्या: । सर्वासाम् । सर्वस्याम् । शेषं रमावत् । एवं विश्वादय आवन्ता: ।

विभाषा दिक्समासे बहुव्रीहौ । १ । १ । २८ ॥

सर्वनामता वा । उत्तरपूर्वस्यै । उत्तरपूर्वायै । तीयस्येति वा संज्ञा । द्वितीयस्यै । द्वितीयायै । एवन्तृतीया । अस्वार्थेति ह्रस्व: । हे अस्व । हे अच्छ । हे अक्ष । जरा । जरसौ । जरे । इत्यादि मत्ते रमावत् । गोपा विश्वपावत् । सति: । सती: । सत्या: ।

ङिति ह्रस्वश्च । १ । ४ । ६ ॥

द्व्यङ्वङ्स्थानौ स्त्री शब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च द्ववर्णावर्णौ स्त्रियां वा नदीसंज्ञौ स्तौ ङिति । सत्यै । सतये । सत्या: २ । सते: २ ।

इदुद्भ्याम् । ७ । ३ । ११७ ॥

इदुद्भ्यां नदीसंज्ञकाभ्यामम्परस्य ङेराम् । सख्याम् । सखी । शेषं हरिवत् । एवम्बुद्ध्यादयः ।

त्रिचतुरोः स्त्रियास्तिसृचतसृ । ७ । ३ । ९९ ॥

स्त्रीलिङ्गयोरेतयोस्तौ स्तो विभक्तौ ।

अचि र ऋतः । ७ । २ । १०० ॥

तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः । स्वादचि । गुणदीर्घौत्वानासभावः । तिस्रः २ । तिसृभिः तिसृभ्यः २ । आम्सि नुट् ॥

न तिसृचतसृ । ६ । ४ । ४ ॥

एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु । द्वे २ । द्वाभ्याम् ३ । द्वयोः २ । गौरी । गौर्यौ । गौर्यः । हे गौरि । गौर्यौ इत्यादि । एवं नद्यादयः । लक्ष्मीः । शेषं गौरिवत् । एवन्तरीतन्त्वयादयः । स्त्री । हे स्त्रि ॥

स्त्रियाः । ६ । ४ । ७९ ॥

अस्येयङ्जादौ प्रत्यये परे । स्त्रियौ । स्त्रियः ।

वाम्शसोः । ६ । ४ । ८० ॥

स्त्रिया इयङ् । स्त्रियम् । स्त्रीम् । स्त्रियः ।

स्त्रीः । स्त्रियौ । स्त्रियः । परत्वान्नुट् । स्त्रीणाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियः ॥

वे यङ्वङ्स्थानावस्त्री । १ । ४ । ४ ॥

द्व्यङ्वङ्स्थानौ स्त्रियौ स्तो नतु स्त्री । हे श्रीः । श्रियै । श्रिये । श्रियाः । श्रियः ॥

वामि । १ । ४ । ५ ॥

द्व्यङ्वङ्स्थानौ स्त्र्याख्यौ यूनि वा नदी-संज्ञौ स्तो नतु स्त्री । श्रीणाम् । श्रियाम् । श्रियि । श्रियाम् । धेनुवदतिवत् ॥

स्त्रियाश्च । ७ । १ । ९९ ॥

स्त्रीवाची क्रोष्टुशब्दवद्भं लभते ॥

ऋदन्तेभ्यो ङीप् । ४ । १ । ५ ॥

ऋदन्तेभ्योलान्तेभ्यश्च स्त्रियां ङीप् । क्रोष्ट्री । गौरीवत् । ब्रूः श्रीवत् । स्वयम्भूः पुंवत् ॥

न षट्स्वस्रादिभ्यः । ४ । १ । १० ॥

ङीपजापौ न । स्वसा तिस्रा तिस्रश्चतस्रश्च ननांदा दुहिता तया । याता सातेति सप्तैते स्वस्रादय उदाहृताः । स्वसा स्वसारौ । याता मिदवत् ।

यस्मि माटः । द्यौर्गौवत् । राः पुम्वत् । नौर्नौ-वत् ॥ इत्यजन्ताः स्त्रीलिङ्गाः ।

॥ अजन्त नपुंसकलिङ्गाः ॥

अतोऽम । ७ । १ । २४ ॥

अतोङ्गात् क्लीवात्स्यमोरम् । ज्ञानम । एङ्-ह्रस्वादितिह्रस्वोपः । हे ज्ञान ॥

नपुंसका च । ७ । १ । १९ ॥

क्लीवादौङः घी भसंज्ञावान् ॥

यस्येति च । ६ । ४ । १४८ ॥

ईकारे तद्धिते च भस्येवर्णावर्णयोर्लोपः ॥ इत्यलोपे प्राप्ते ।

औङः श्यामतिषेधो वाच्यः ॥

ज्ञाने ॥

जश्शसोः शिः । ७ । १ । २० ॥

क्लीवात् ॥

शि सर्वनामस्थानम् । १ । १ । ४२ ॥

नपुंसकस्य झलचः । ७ । १ । ७२ ॥

अलन्तस्याजन्तस्य च क्लीवस्य नुम् स्यात् सर्व-नामस्थाने ॥

मिदचोऽन्त्यात्परः । १ । १ । ४७ ॥

अचाम्मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवस्तवो-मित्स्यात् । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं पुंवत् । एवन्धनफदयः ॥

अदड्डतरादिभ्यः पञ्चभ्यः ।७।१।२५॥

एभ्यः क्लीबेभ्यः स्वमोरदड्डादेशः स्यात् ॥

टेः । ६ । ४ । १५३ ॥

ङिति भस्य टेर्लोपः । कतरत् । कतरद् । कतरे । कतराणि । कतरत् । शेषम्पुंवत् । एवङ्कत-मत् । इतरत् । अन्यत् । अन्यतरत् । अन्यत-मस्य त्वन्यतमम् इत्येव । एकतरात्प्रतिषेधः । एक-तरम् ॥

ह्रस्वो नपुंसके प्रातिपदिकस्य ।१।२।४७॥

अजन्तस्येत्येव । ज्ञानम् । ज्ञानवत् ॥

स्वमो र्नपुंसकात् । ७ । १ । २३ ॥

लुक् स्यात् । वारि ॥

इकोऽचि विभक्तौ । ७ । १ । ७३ ॥

ङ्गन्तस्यक्लीवस्य नुमचि विभक्तौ। वारिणी। वारीणि। नलुमतेत्य स्यानित्यत्वात्पक्षे उम्वृद्धि-निमित्तोगुणः। हे वारि। हे वारे। वेर्ङितीति गुणे प्राप्ते॥

वृद्धौत्वट्ज्वङ्गावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन॥

वारिणे। वारिणः। वारिणोः २। वरिणा २। नुमचिरेति नुट। वारीणाम्। वारिणि। हलादौ हरिवत्॥

अस्थिदधिसक्थ्य ऽक्ष्णामनङुदात्तः।
७। १। ७४॥

टादावचि॥

अक्नोपोऽनः। ६। ४। १३४॥

अङ्गावयवोऽसर्वनामस्थान यजादिपरो योऽन तस्याकारस्य लोपः। दक्ना। दक्ने। दक्नः २। दक्नोः॥

विभाषा ङिश्योः। ६। ४। १३६॥

अङ्गावयवोऽसर्वनामस्थानपरो योऽन तस्याकारस्यलोपो वा स्यात् ङिश्योः परयोः। दक्नि।

शेषस्त्रारिवत्। एवमस्थिशक्ष्यक्षि। सुधि। सुधिनी। सुधीनि। हे सुधे। हेसुधि। सुधिनेत्यादि। मधु। मधुनी। मधूनि। हे मधो। हे मधु। सुलु। सुलुनी। सुलूनि। सुलुनेत्यादि। धातृ। धातृणी। धातृणि। धातृणाम्। हे धातः। एवंज्ञात्रादयः॥

एच इग्घ्रस्वादेशे। १। १। ४८।

प्रभ्। प्रभुनी। प्रभूनि। प्रभूनेत्यादि। प्रभि। प्रभिणी। प्रभीणि। प्रभिणा। एकदेशविकृतमनन्यवत्। प्रभ्याम्। प्रभीणाम्। प्रभु। प्रभुनी। प्रभूनि। प्रभुनेत्यादि॥

इत्यजन्त नपुंसकलिङ्गाः॥

॥ हलन्त पुंलिङ्गाः॥

दो दः। ८। २। ३१॥

झलि पदान्ते च। लिट्। लिड़्। लिड्वौ। लिड्भिः। लिड्भ्याम्। लिट्सु। लिट्त्सु॥

दाधेर्घातो र्धः। ८। २। ३२॥

झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य धः ॥

एकाचोवशो भषझषन्तस्य स्ध्वोः । ८ ।

२ । ३७ ॥

धात्ववयवस्यैकाचोझषन्तस्य वशोभष् से ध्वे पदान्ते च । धुक् । धुग् । दुह्यौ । दुह्यः । धुग्भ्याम् । धुक्षु ॥

वा द्रुहमुहस्नुहस्नुह्णाम् । ८ । २ । ३३ ॥

एषां हस्य वा धो झलि पदान्ते च । भुक् । भुग् । भुट् । भुड् । द्रुह्यौ । द्रुह्यः । भुग्भ्याम् । भुड्भ्याम् । भुक्षु । भुट्सु । भुट्त्सु । एवम्मुह ॥

धात्वादेषः सः । ६ । १ । ६४ ॥

स्नुट् । स्नुड् । स्नुक् । स्नुग् । एवं स्निह् ॥

इग्यणः संप्रसारणम् । १ । १ । ४५ ॥

वाह ऊठ् । ६ । ४ । १३२ ॥

अस्य वाहः संप्रसारणमूठ् ॥

संप्रसारणाच्च । ६ । १ । १०८ ॥

संप्रसारणादचि पूर्वरूपमेकादेशः । दृह्वेः । विश्नौहः । इत्यादि ॥

चतुरनडुहोरामुदात्तः । ७ । १ । ९८ ॥

सावनडुहः । ७ । १ । ८२ ॥

सुम् । अनड्वान् ॥

अम् सम्बुद्धौ । ७ । १ । ९९ ॥

हे अनड्वन् । अनड्वाहौ २ । अनड्वाहः ॥

वसुस्रंसुध्वंस्वनडुहां दः । ८ । २ । ७२ ॥

सान्तस्य वस्वन्तस्य स्रंसादेश्च दस्यात्मदान्ते । अनड्दृभ्यामित्यादि । सान्तेति किम् । विद्वान् । पदान्तेति किम् ॥ स्रस्तम् । ध्वस्तम् ॥

सहेः साडः सः । ८ । ३ । ५६ ॥

साड्रूपस्य सहेरस्य मूर्द्धन्यादेशः । तुरा-षाट् । तुराषाड् । तुरासाहौ । तुरासाहः । तुरा-षाड्भ्यामित्यादि ॥

दिव औत् । ७ । १ । ८४ ॥

दिविति प्रातिपदिकस्यौत्स्यात्सौ । द्युः । द्युदिवौ ॥

दिव उत् । ६ । १ । १३१ ॥

पदान्ते ॥ द्युभ्याम् । द्वित्यादि । चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः ॥

षट्चतुर्भ्यश्च । ७ । १ । ५५ ॥

एभ्य आमोनुडागमः ॥

रषाभ्यान्नो णः समानपदे । ८ । ४ । १ ॥

अचो रहाभ्यान्द्वे । ८ । ४ । ४६ ॥

अचः पराभ्यां रेफहकाराभ्यां परस्य वर्गान्तो
वा नः । चतुर्णाम् ॥

दोः सुपि । ८ । ३ । १६ ॥

दोरेव विसर्गः सुपि । पक्षे । पक्षे । पक्ष द्वित्वे
प्राप्ते ॥

शरोऽचि । ८ । ४ । ४९ ॥

अचि परे शरो न द्वे स्तः । चतुर्षु ॥

सो नो धातोः । ८ । २ । ६४ ॥

पदान्ते । प्रणान् ॥

किमः कः । ७ । २ । १०३ ॥

विभक्तौ । कः । कौ । के । इत्यादि । सर्ववत् ॥

इदमो मः । ७ । २ । १०८ ॥

औ । त्यदाद्यत्वापवादः ॥

इदोऽय पुंसि । ७ । २ । १११ ॥

इदम इदोऽय् सौपुंसि । अयम् । त्यदाद्यत्वे ॥

अतो गुणे । ६ । १ । ९७ ॥

अपदान्तादतोगुणेपर रूपमेकादेशः ॥

हशि । ७ । २ । १०९ ॥

इदमोदस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेस्त्रयोधनञ्चास्तीत्युत्सर्गः ॥

अनाप्यकः । ७ । २ । ११२ ॥

अककारस्य इदमइदो ऽनापि विभक्तौ । आविति प्रत्याहारः । अनेन ॥

हलि लोपः । ७ । २ । ११३ ॥

अककारस्येदमइदोलोप आपि हलादौ । नानर्थके ऽलोऽन्त्यविधिरनभ्यासविकारे ॥

आद्यन्तवदेकस्मिन् । १ । १ । २१ ॥

एकस्मिन् क्रियमाणं कार्य्यमादाविवान्त इव स्यात् । सुपिचेति दीर्घः । आभ्याम् ॥

नेदमदसोरकोः । ७ । १ । ११ ॥

अककारयोरिदमदसोर्भिस ऐस न । एभिः । अस्मै । एभ्यः । अस्मात् । अस्य । अनयोः२ । एषाम् । अस्मिन् । एषु ॥

द्वितीयाटौस्वेनः । २ । ४ । ३४ ॥

इदमेतदोरन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुम्पुनरुपादानमन्वादेशः ।

यथा अनेन व्याकरणमधीतमेनञ्छन्दो ऽध्यापयेति ॥

अनयोः पवित्रं कुलम् । एनयोः प्रभूतं स्वमिति । एनस् । एनौ । एनान् । एनेन । एनयोः२ । राजा ॥

नडिसम्बुद्ध्योः । ८ । २ । ८ ॥

नस्य लोपो न डौ सम्बुद्धौ च । हे राजन् ॥

ङावुत्तरपदे प्रतिषेधः ॥

ब्रह्मनिष्ठः । राजानौ । राजानः राज्ञः ॥

नलोपः सुप्तुप रसंज्ञातुग्विधिषु क्ङिति ।

८ । २ । २ ॥

सुब्विधौ स्वरविधौसंज्ञाविधौ क्ङिति तुग्विधौ नलोपो ऽसिद्धोनान्यत्र । राजाश्व इत्यादौ न । इत्यसिद्धत्वादात्वमेत्वमैखञ्च न । राजभ्याम् । यज्वा । यज्वानौ । यज्वानः ॥

न संयोगाद्वमन्तात् । ६ । ४ । १३७ ॥

वसान्तसंयोगादनो ऽकारस्यलोपो न । यज्वनः ।
यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा ॥

इन्हन्पूषार्य्यम्णां शौ । ६ । ४ । १२ ॥

एषां शावेवोपधया दीर्घो नान्यत्र । इति
निषेधेप्राप्ते ॥

सौ च । ६ । ४ । १३ ॥

इन्नादीनामुपधाया दीर्घो ऽसम्बुद्धौ सौ ।
वृत्रहा । हे वृत्रहन् ॥

एकाजुत्तरपदे णः । ८ । ४ । १२ ॥

एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपद-
स्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम् विभक्ति-
स्थस्य नस्य णः । वृत्रहणौ ॥

हो हन्तेर्ञ्णिन्नेषु । ७ । ३ । ५४ ॥

ञिति णिति प्रत्यये नकारेच परे हन्तेर्हकारस्य
कुत्वम् । वृत्रघ्नः । इत्यादि । एवं घार्ङ्गिन् यघर्ष्टिन्
अर्य्यमन् पूषन् ॥

मघवा बहुलम् । ६ । ४ । १२८ ॥

मघवन् शब्दस्य वाद् इत्यन्तादेशः । ऋदुत् ॥

उगिदचां सर्वनामस्थानेऽधातोः । ७ । १ । ७० ॥

ऋधातोरुगितोनलोपिनोऽञ्चतेश्च नुम् स्यात्सर्व-
नामस्थाने । मघवान् । मघवन्तौ । मघवन्तः ।
हे मघवन् । मघवत्याम् । त्वाभावे । मघवा ।
सुटि । राजवत् ॥

श्वयुवमघोनामतद्धिते । ६ । ४ । १३३ ॥

अन्तानाञ्भानामेषामतद्धिते संप्रसारणम्
मघोनः । मघवत्याम् । एवं श्वन्युवन् ॥

न संप्रसारणे संप्रसारणम् ।६।१।३७॥

यूनः । यूना । युवभ्याम् । इत्यादि । अर्वा हे
अर्वन् ॥

अर्वणस्त्रसावनञः । ६ । ४ । १२७ ॥

मत्रारहितस्यार्वन्नन्तस्याङ्गस्य ट इत्यन्तादे-
शोनतु सौ । अर्वन्तौ । अर्वन्तः । अर्वद्भ्या-
मित्यादि ॥

पथिमथ्यृभुक्षामात् । ७ । १ । ८५ ॥

सौ ॥

इतोऽत्सर्वनामस्थाने । ७ । १ । ८६ ॥

पय्यादेः ॥

ो न्यः । ७ । १ । ८७ ॥

पयिमधोरस्य न्यादेशः सर्वनामस्थाने । पन्थाः । पन्थानौ । पन्थानः ॥

अस्य टेर्लोपः । ७ । १ । ८८ ॥

अस्य पथ्यादेष्टिलोपः । पथः । पथा ॥ पथिभ्याम् । एवन्मथिन् ऋभुक्षिन् ॥

ष्णान्ताः षट् । १ । १ । २४ ॥

षान्ता नान्ता चसंख्या षट्संज्ञा स्यात् । पञ्च नशब्दोनित्यबहुवचनान्तः । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः २ । हुट ।

नोपधायाः । ६ । ४ । ७ ॥

नान्तस्योपधाया दीर्घोनामि । पञ्चानाम् । पञ्चसु ॥

अष्टन आ विभक्तौ । ७ । २ । ८४ ॥

हलादौ वा स्यात् ॥

अष्टाभ्य औश् । ७ । १ । २१ ॥

जसाकारादष्टनोजश्शसो रौश् । अष्टभ्य इति वक्तव्येऽकृत्वनिर्देशोजश्शसोर्विषये आत्वं ज्ञापयति ।

अष्टौ । अष्टाभ्यः २ । अष्टानाम् । अष्टासु ।
आत्वाभावे षष्ट पञ्चवत् ॥

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रु-
ञ्चाञ्च । ३ । २ । ५९ ॥

एष्यः क्विन् अञ्चेश्चुप्युपपदे । युजि क्रुञ्चोः केव-
लयोः । क्रुञ्चेर्नलोपाभावश्च निपात्यते क्रनवितौ ॥

क्विदतिङ् । ३ । १ । ९३ ॥

अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः क्वित्संज्ञः
स्यात् ॥

वेरपृक्तस्य । ६ । १ । ६७ ॥

लोपः ॥

क्विन्प्रत्ययस्य कुः । ८ । २ । ६२ ॥

क्विन्प्रत्ययोस्यान्तस्य कवर्गोऽन्तादेशः पदान्ते ।
इत्यस्यासिद्धत्वाच्चोः कुरिति कुत्वम् । ऋत्विक् ।
ऋत्विग । ऋत्यिजौ । ऋत्विग्भ्याम् ।

युजेरसमासे । ७ । १ । ७१ ॥

युजेस्सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः ।
कुत्वेन नस्य ङः । युङ् । युञ्जौयुञ्जः युग्भ्याम् ।

चोः कुः । ८ । २ । ३० ॥

चवर्गस्य कवर्गः स्याज्झलि पदान्तेच ।
सुवाक् । सुवाग्भ्याम् । सुवाग्भिः । सुवाग्भ्यः । सुवाग्भ्यः ।
सुवाचौ । सुवाचः । सुवाक्षु ॥

व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां
षः । ८ । २ । ३६ ॥

झलिपदान्तेच । जश्त्वचर्त्वे । राट् । राड् ।
राजौ । राजः । राड्भ्याम् । एवं विभ्राट् ।
देवेट् । विश्वस्रट् ॥

परौ व्रजेः षः पदान्ते ॥

परावुपपदे व्रजेः क्विप् स्यात् दीर्घश्चपदान्तं
षत्वमपि । परिव्राट् । परिव्राड् । परिव्राजौ ॥

विश्वस्य वसुराटोः । ६ । ३ । १२८ ॥

दीर्घः । विश्वाराट् । विश्वाराड् । विश्वराजौ ।
विश्वाराड्भ्याम् ॥

स्कोस्संयोगाद्योरन्ते च । ८ । २ । २९ ॥

पदान्ते झलि च यस्संयोगस्तदाद्योः स्को-
र्लोपः । क्षट् क्षड् । सस्य श्चुत्वेन शः ।

ऋलाञ्नश्चसि इति शस्य जः । भ्यौ । भ्यड्-
भ्याम् ॥ त्यदाद्यत्वम्पररूपत्वम् ॥

तदोः सावनन्त्ययोः । ७ । २ । १०६ ॥

त्यदादीनान्तदयोरनंत्ययोस्स स्यात्सौ । स्यः ।
त्यौ । त्ये । सः । तौ । ते । यः । यौ ।
ये । एषः । एतौ । एते ॥

ङे प्रथमयोरमः । ७ । १ । २८ ॥

युष्मदस्मभ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीय-
योरामादेशः ।

त्वाहौ सौ । ७ । २ । ९४ ॥

अनयोर्म्मपर्य्यन्तस्य त्वाहौ आदेशौ स्तः ॥

शेषे लोपः । ७ । २ । ९० ॥

एतयोष्टिलोपः । त्वम् । अहम् ॥

युवावौ द्विवचने । ७ । २ । ९२ ॥

वयोरुक्तयोर नयोर्म्मपर्य्यन्तस्य युवावौ स्तो
विभक्तौ ॥

प्रथमायाश्च द्विवचने भाषायाम् । ७ ।
२ । ८८ ॥

औङेरतयौरात्वं लोके। युवाम्। आवाम्॥

यूयवयौ जसि। ७। २। ९३॥

अनयोर्ऋपर्य्यन्तस्य। यूयम्। वयम्॥

त्वमावेकवचने। ७। २। ९७॥

एकस्योक्तावनयोर्ऋपर्य्यन्तस्य त्वमौ स्तो विभक्तौ॥

द्वितीयायाञ्च। ७। २। ८७॥

अनयोरात्स्यात्। त्वाम्। माम्॥

शसो न। ७। १। २९॥

आभ्यां शसो नः स्यादमो ऽपवादः। आदेः-

परस्य। संयोगान्तलोपः। युष्मान्। अस्मान्॥

यो ऽचि। ७१। ८९॥

अनयोर्य्यकारादेशः स्यादजादौ परतः।

त्वया। मया।

युष्मदस्मदोरनादेशे। ७। २। ८९॥

अनयोरात्स्यादनादेशे हलादौ। युवाभ्याम्।

आवाभ्याम्। युष्माभिः। अस्माभिः॥

तुभ्यमह्यौ ङयि। ७। २। ९०॥

अनयोर्ऋपर्य्यन्तस्य। टिलोपः। तुभ्यम्।

मह्यम्॥

ष्यङोऽप्यत् । ७ । १ । २० ॥

आर्य्यास्मरस्य । युष्मद्यत् । अस्मद्यत् ।

एकवचनस्य । ७ । १ । २१ ॥

आर्य्यां ङसेरत् । त्वत् । मत् ॥

प्रत्ययस्य लुक् । ७ । १ । २२ ॥

आर्य्याष्यङश्च्यया ष्यङोऽत्खात्। युष्मत् । अस्मत् ॥

तवममौ ङसि । ७ । २ । ९८ ॥

अनयोरंपर्य्यन्तस्य ॥

युष्मदस्मद्भ्यां ङसोऽश । ७ । १ । २७ ॥

तव । मम । युवयोः । आवयो ॥

साम आकम । ७ ॥ १ । २३ ॥

आर्य्यां साम आकम् । युष्माकम् । अस्माकम् त्वयि । मयि युवयो । आवयोः युष्मासु चास्मासु ॥

युष्मदस्मदोष्षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ । ८ । १ । २० ॥

मदात्मकयोरपादादौ स्थितयो षष्ठ्रादिविशिष्टयोर्वान्नावौ इत्यादेशौ स्तः ॥

बहुवचनस्य वस्नसौ । ८ । १ । २१ ॥

उक्तविषयोरनयोष्षष्ठ्यादि वच्चनान्तयोर्वस्न सौ स्तः ॥

तेमयावेकवचनस्य । ८ । १ । २२ ॥

उक्तविषयोरनयोष्षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ॥

त्वामौ द्वितीयायाः । ८ । १ । २३ ॥

द्वितीयैकवच्चनान्तयोस्त्वामा इत्यादेशौ स्तः श्रीश-स्त्वाऽवतु मामोह दत्तात् ते सेऽपि घर्म्मस्तः ॥ स्वामी ते सेऽपि स हरिः पातु वामपि नौ विंशु ॥ सुखञ्चानौ ददात्वीशः पतिर्वांसपि नौ हरिः । सोऽव्याद्वो नघृणिवच्चो नो दद्यात् सेव्योऽत वः स न: ॥

एकवाक्ये युष्मदस्मदादेशा वक्तव्याः ।

अन्यादेशे तु नित्यं स्यः । धाता ते अस्तोऽस्ति तस्मै ते नम इत्येव । सुपात् । सुपाद् । सुपादौ ।

पादः पत् । ६ । ४ । १३० ॥

पाच्छब्दान्तं यदङ्गन्तदवयवस्य पाच्छब्दस्य यथादेशः । सुपद्सुपदा । सुपाद्भ्याम् । अग्नि-

सत् । अग्निसचौ । अग्निसचस ।

अनिदितां हल उपधायाःक्ङिति ।

६ । ४ । २४ ॥

हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः क्ङितिङिति । बुभ । संयोगान्तस्य लोपः । नस्य कुत्वेन ङः । प्राङ् प्राञ्चौ । प्राञ्चः ।

अचः । ६ । ४ । १३८ ॥

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः ।

चौ । ६ । ३ । १३८ ॥

लुप्ताकारनकाराञ्चतौ परे पूर्वस्याणोदीर्घः प्राचः प्राग्भ्याम् । प्रत्यङ् । प्रत्यञ्चौ । प्रतीचः । प्रत्यग्भ्याम् । उदङ् उदञ्चौ ।

उद ईत् । ६ । ४ । १३९ ॥

उच्चैरुदात्परस्य लुप्तनकाराञ्चतेर्भस्य ईत् उदीचः । उदग्भ्याम् ॥

समस्समि: । ६ । ३ । ९३ ॥

अप्रत्ययान्तेऽञ्चतौ । सम्यङ् । सम्यञ्चौ । समीचः । सम्यग्भ्याम् ॥

सत्वस्य सन्धिः । ६ । ३ । ८५ ॥

तथा सध्वक ॥

तिरसस्तिर्यलोपे । ६ । ३ । ८६ ॥

अनुभाकारेऽञ्चतौ अप्रत्ययान्ते तिरसस्तिर्यादेशः । तिर्यङ् ॥ तिर्यञ्चौ । तिरश्चः । तिर्यग्भ्याम् ।

दाञ्चेः पूजायाम् । ६ । ४ । ३० ॥

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न । प्राङ् । प्राञ्चौ । नलोपाभावाल्लोपो न प्राञ्चः । प्राङ्भ्याम् । प्राङ्क्षु । एवम्पूजार्थं प्रत्यङादयः । क्रुङ । क्रुञ्चौ । क्रुङ्भ्याम् । पयोमुक् । पयोमुग् । पयोमुचौ । पयोमुग्भ्याम् । उगित्वाद्नुम ॥

सान्तमहतस्य संयोगस्य । ६ । ४ । १० ॥

सान्तसंयोगस्य महतश्च योनकारस्योपधाया दीर्घोऽसर्वनामस्थाने । महान् । महान्तौ । महान्तः । हे महन् । महद्भ्याम् ॥

अल्लोपस्य च । ६ । ४ । १४ ॥

अत्वन्तस्योपधाया दीर्घोधातुभिन्नासन्तस्य च। सध्वुद्यौ। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्। यसादौ सच्छत्। आतेर्डवतुः। ङित्व सामर्थ्यादस्यापि टेर्लोपः। भवान्। भवन्तौ। शतन्तस्य भवन्॥

उभे अभ्यस्तम्। ६। १। ५॥

षाट्द्वित्वप्रकरणे ये हे विहिते उभे समुदिते अभ्यस्तसञ्ज्ञे स्तः॥

नाऽभ्यस्ताच्छतुः। ७। १। ७८॥

अभ्यस्ताच्छतुर्नुम् न ददत्। ददतौ।

जक्षित्यादयः षट्। ६। १। ६॥

षड्धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः। जक्षत्। जक्षतौ॥ जक्षतः॥ एव जाग्रत्। दरिद्रत्। शासत्। चकासत्। शुभ्। शुभौ। शुभः। शुभ्यास।

त्यदादिषु दृशोऽनालोचने कञ्च। ३। २। ६०॥

त्यदादिषूपपदेषु अज्ञानार्थदृशेः कञ् चात् क्विन्।

आ सर्व्वनाम्नः । ६ । ३ । ९१ ॥

हग् हृश् वतुषु । ताहक् । ताहृशौ । ताहृशः । ताहृग्भ्याम् । वश्चेति षः । जश्त्वचर्त्वे । विट् विड् । विशौ विशः । विड्भ्याम् ॥

नशेर्वा । ८ । २ । ६३ ॥

नशेः कवर्गेऽन्तादेशो वा पदान्ते । नक् । नट् । नशौ । नशः । नग्भ्याम् । नड्भ्याम् ।

स्पृशोऽनुदके क्विन् । ३ । २ । ५८ ॥

अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक् घृतस्पृशौ । घृतस्पृशः । स्पृष्टक् । दृष्टौ । दृष्टस्याम् । रत्नमुट् । रत्नमुषौ । रत्नमुड्भ्याम् । षट् । षड्भिः । षट्भ्यः । षण्णाम् । षट्सु । षत्वस् प्रति षत्वस्यासिद्धत्वात्सस्जुषोरिति सत्वम् ॥

वेरपृक्तस्य हलादेर्लोपः । ८ । २ । ७६ ।

वेरपृक्तान्तयो रुपधाया ह्रस्वोदीर्घः पदान्ते प्रिपटीः प्रिपटिभ्याम् । प्रिपटीर्भ्याम् ॥

नृन् विसर्जनीय श्शर्व्ववायेऽपि । ८ । ३ । १६ ॥

एतैः प्रत्येकं व्यवधानेऽपि दृग्ग् क्रुश्व्याम्परस्य सस्य मूर्द्धन्यादेशः । ष्टुत्वेन पूर्वस्य षः । पिपटीष्षु पिपठीःषु । चिक्वीः चिक्वीषौ । चिक्वीभ्योस् । चिक्वीषुं । विद्वान् । विद्वांसौ । हे विद्वन् ।

वसोस्सुंप्रसारणम् । ६ । ४ । १३१ ॥

वस्वन्तस्य अस्य सम्प्रसारणं स्यात् । विदुषः । वसुस्सं स्विति दः विद्वꣳसम् ।

पुंसोऽसुङ् । ७ । १ । ८६ ॥

सर्वनामस्थाने । पुमान् । हे पुमन् पुमांसौ । पुंसः । पुम्स्याम् । पुंसु ऋदुशनेत्यनङ् । उशना । उशनसौ ।

अस्य सम्बुद्धौ वा नङ् नलोपश्च वा वाच्यः । हे उशनन्ः । हे उशनः । हे उशनसौ । उशनोस्याम् । उशनस्सु । अनेहाः अनेह सौ हे अनेहः । वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ।

अदस औसुलोपश्च । ७ । २ । १०७ ॥

अदसऔत्स्यात्सौ सुलोपश्च ॥ तदोरिति दः । असौ । त्यदाद्यत्वम् । पररूपत्वम् । वृद्धिः ।

अदसोऽसेर्दादु दोमः । ८ । २ । ८० ॥

अदसो ऽसान्तस्य दात्परस्य उदूतौ दस्य मच ।
आन्तरतम्याद्ध्रस्वस्य उः दीर्घस्य ऊः अमूजसघ्यौ ।
द्युभ्यः ॥

एतद्दहुईवचने । ८ । २ । ८१ ॥

अदसोदात्तस्यैत दूदस्य सो वचयौतौ ।
अमी पूर्वत्रासिद्धमितिविभक्तिकार्यं प्राक् पश्चादुत्व-
मत्वे । अमुष् । अमू । अमून् । सुत्वे कृते विसंज्ञायां
नाभाव: ॥

न मुने । ८ । २ । ८२ ॥

नाभावे कर्तव्ये कृते च सुभावोनासिद्ध:अमुना ।
स्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वार्द्ध-धातुके । मित्वाद्म्ध्यादचः परः । स्थानषष्ठीनिर्देशा-द्रोपधयोर्निवृत्तिः । वस्रर्ज्ज । वस्रर्ज्जतुः । वस्रर्ज्जिथ । वस्रष्ट्र । वस्रज्ज । वस्रज्जतुः । वस्रज्जिथ । स्रोरितिस्र-लोपः । ब्रश्चेति षः ॥ वस्रष्ट्र । वसर्ज्ज । वस्रज्जे । अष्टा । स्रष्टा । स्रक्ष्यति । अर्क्ष्यति । कङिति रमागमस्था-धित्वा संप्रसारणस्यैव विप्रतिषेधेन । स्रज्यात् । स्रज्या-

स्रास्। भृज्यासुः। अर्क्षीष्ट। अस्रक्षीष्ट। अस्राक्षीत्। अभार्क्षीत्। अभर्ष्ट। अस्रष्ट। कृष विलेखने ॥ ४ ॥

कृषति। कृषते। चकर्ष। चकृषे।

अनुदात्तस्यचर्दुपधस्यान्यतरस्याम्। ६। १। ५९ ॥

उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वाक्षलादाव-किति। कृष्टा। कर्ष्टा। कृक्षीष्ट।

स्पृश मृश कृष तृप दृपॢ हृषॢ: सिच्वा वाच्यः। अकार्क्षीत्। अकार्ष्टीत्। अकृक्षत्। अकृष्ट। अकृक्षाताम्। अकृक्षत्। मिल सङ्गमे ॥ ५ ॥ मिलति। मिलते। मिमेल। मेलिता। अमेलीत्। मुच्लृ मोचने ॥ ६ ॥

मुचादीनाम्। ७। १। ५८ ॥

मुच् लिप् विद् लुप् सिच् कृत् खिद् पिशान्तम्। मुञ्चति। मुञ्चते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षाताम्। लुप्लृ छेदने ॥ ७ ॥ लुम्पति। लुम्पते। लोप्ता। अलुपत्। अलुप्त। विद्लृ लाभे ॥ ८ ॥ विन्दति। विन्दते। विवेद। विविदे। व्याघ्रभूतिसते सेट्। वेदिता भव्यमतेऽनिट्। परिवेत्ता। षिच क्षरणे ॥ ९ ॥ सिञ्चति। सिञ्चते।

लिपिसिचिह्श्च । ३ । १ । ५३ ॥

एभ्यश्च लेरङ् । असिचत् ।

आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ॥

लिपिसिचिह्नः परस्यच्लेरङ्वा । असिचत् । असिक्त । लिप उपदेहे ॥ १० ॥ उपदेहो वृद्धिः । लिम्पति । लिम्पते । लेप्ता । अलिपत् । अलिपत । अलिप्त ॥

इति उभयपदिनः ॥

तुदादयः ॥

कृती छेदने । ११ । कृन्तति । चकर्त्त । कर्त्तिता । कर्त्तिष्यति । कर्तस्यति । अकर्त्तीत् । खिद परि-घाते । १२ । खिन्दति । चिखेद । खेत्ता । पिश अवयवे । १३ । पिंशति । पेशिता । ओव्रश्चू छेदने । १४ । वृश्चति । वव्रश्च । वव्रश्चिथ । वव्रष्ठ । व्रश्चिता । व्रष्टा । व्रश्चिष्यति । व्रक्ष्यति । वृश्चात् । अव्रश्चीत् । व्यच व्याजीकरणे । १५ । विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति ।

विच्यात् । अव्याचीत् । अव्यचीत् । व्यचेः कुटादित्व-
मनसीतितु नेह प्रवर्त्तते । अनसीति पर्व्युदासेन-
क्त्न्मात्र विषयत्वात् । उञ्छि उंञ्छे । १६ । उञ्छः
कणश आदानं । कणिशाद्युञ्छनं श्लिलमिति यादवः ।
ऋच्छ्गतीन्द्रियप्रलयमूर्त्तिभावेषु । १७ । ऋच्छति ।
ऋच्छत्यृतामिति । गुणः । द्विहल्ग्रहणस्यानेकहलुपल-
क्षणत्वात् ङुट् । आनर्च्छ । आनर्च्छतुः । ऋच्छिता ।
उज्झ उत्सर्गे । १८ । उज्झति । लुभ विमोहने ॥
१९ ॥ लुभति ॥

तीषसहलु भलषिक्षः । ७ । २ । ४८ ॥

ऋच्छत्यादेः परस्य तादेरार्द्धधातुकस्येड् स्यात् ।
लोभिता । लोब्धा । लोभिष्यति । टुप टुक्ष टुप्तौ ।
२० ॥ २१ ॥ टुपति । ततर्प । तर्पिता । अतर्पीत् ।
टुक्षति ॥

ष्टे टुक्षादीनां धुट् वाच्यः । आदिशब्दः प्रकारे ।
तेन येऽत्र नकारानुबन्धास्ते टुक्षादयः । ततक्ष ।
टक्ष्यात् । स्वड़ ष्टड़ क्षुखने ॥ २२ ॥ २३ ॥ स्वड़ति ।
ष्टडति क्षुन गतौ ॥ २४ ॥ सनति । इषु इच्छावाक् ॥
२५ ॥ इच्छति । एषिता । एष्टा । एषिष्यति ।

ङ्ष्वात् । ऐषीत् । कुट कौटिल्ये । ॥ २६ ॥ णाङ् कुटादीति ङित्वम् । चुकुटिय । चुकोट । चकुट । कुटिता । पुट संश्लेषणे ॥ २७ ॥ पुटति । पुटिता । स्फुट विकसने । २८ । स्फुटति । स्फुटिता । स्फुरस्फुल सञ्चलने । २९ । ३० । स्फुरति । स्फुलति ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः ।८।३।७६॥

षत्वं वा । निस्फुरति । निष्फुरति । ष्णू स्तवने । ३१ । परिष्णूतगुणोदयः । ष्णुवति । ष्णुनाव । ष्णुविता । ष्टुमस्जो शुद्धौ । ३२ । मज्जति । ममज्ज । मस्जिनशोरिति नुम् ।

नश्चेरन्त्यात् पूर्वो नुम् वाच्यः । संयोगादिलोपः । मसंक्ष्य ॥ ममञ्जिथ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । ष्रुजो भ्रङ्गे । ३३ । ष्रुजति । ष्रोक्ता । ष्रोक्ष्यति । अष्रौक्षीत् । भ्रुजो कौटिल्ये । ३४ । ष्रुजिवत् । विश प्रवेशने । ३५ । विशति । ष्टश आमर्शने । ३६ । आमर्शनं स्पर्शः । अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । अन्राक्षीत् । अमार्क्षीत् । अष्टक्षत् । षद्लृ विशरणगत्यवसादनेषु । ३७ ।

सीदतीत्यादि । षदॢ ऌ गतौ ॥ ३८ ॥

ङ्ङेङ्ङिति: । १ । ३ । ९० ॥

घिङ्ङिनोऽस्मात्तङानौ स्तः । षीयते । षीय-
ताम् । षीयेत । अषीयत । षद्यात् । षत्ता । षत्-
स्यति । अषदत् । अषत्स्यत् । ॡ विक्षेपे । ३९ ॥

ऋत इद्धातोः । ७ । १ । १०० ॥

किरति । चकार । चकरतुः । चकरुः । करिता ।
करीता । कीर्य्यात् ॥

क्रियौ क्षेपणे । ९ । १ । १४० ॥

उपात्किरते स्सट् क्षेपने । उपस्किरति ।

अडभ्यासव्यवायेऽपि । ९ । १ । १३९ ॥

सट्कात्पूर्व्व इति वक्तव्यम् । उपास्किरत् ।
उपचस्कार ॥

हिंसायां प्रतेश्च । ९ । १ । १४१ ॥

उपात्प्रतेश्च किरतेस्सट् हिंसायाम् । उपस्कि-
रति । प्रतिस्किरति । ट निगरणे ॥ ४० ॥

अचि विभाषा । ८ । २ । २१ ।

गिरते रेफस्य लोऽजादौ प्रत्यये । गिलति ।
गिरति । जगाल । जगार । जगलिथ । जगरिथ ।

गल्भिता । गलीता । गर्हिता । गरीता । प्रच्छ ज्ञीप्सायाम् । ४१ । ग्रन्थिन्या इति सम्प्रसारणम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छुः । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । स्वड् प्राणत्यागे । ४२ ॥

क्ष्विदेर्लुङ्लिङोश्च । १ । २ । ९१ ॥

लुङ् लिङोः शितश्च प्रकृतिभूतान्त्वङ्क्तङ्कानौ नान्यत्र । रिङ् । ऊयङ् । म्रियते । संसार । मर्त्ता । मरिष्यति । स्वपीष्ट । अस्वत ॥ ष्वङ् व्याप्तौ ॥ ४३ ॥ प्रारेणायं व्याङ्पूर्वः । व्यामियते । व्यापप्रे । व्यापप्राते । व्यापरिष्वते । व्याष्ट । व्याष्टघाताताम् । जुषी प्रीतिसेवनयोः । ४४ । जुषते । जुजुषे । ओर्विजी भयचलनयोः ॥ ४५ ॥ प्राचेग् उतपूर्वः । उद्विजते ॥

विज इट् । १ । २ । २ ॥

विजेः पर इड़ादिप्रत्ययो ङिद्वत् । उद्विजितः ॥

॥ इतिलुदादयः ॥

क्र्याढ्यः ॥

क्षिरावरणे ॥ १ ॥

क्र्याढिश्यः स्रस् । ३ । १ । ७८ ॥

घ्नपोऽपवादः । क्रणद्धि । स्नसोरल्लोपः । क्रन्द्धः । क्रन्धन्ति । क्रणत्सि । क्रन्द्धः । क्रन्द्ध । क्रणध्मि । क्रन्ध्वः । क्रन्ध्मः । क्रन्धे । क्रन्धाते । क्रन्धते । क्रन्त्से । क्रन्धाथे । क्रन्ध्वे । क्रन्धे । क्रन्ध्वहे । क्रन्ध्महे । क्रराेध । क्ररुधे । रोद्धा । रोत्स्यति । रोत्स्यते । क्रणद्धु । क्रन्द्धात् । क्रन्द्धां । क्रन्धन्तु । क्रन्धि । क्रणधानि । क्रणधाव । क्रणधाम । क्रन्द्धाम् । क्रन्धाताम् । क्रन्धताम् । क्रणत्स्व । क्रणधै । क्रणधावहै । क्रणधामहै । अक्रणत् । अक्रणद्ध । अक्रन्द्धाम् । अक्रन्धन् । अक्रनद्ध । अक्रन्धाताम् । अक्रन्धत । क्रन्ध्यात् ॥ क्रन्धीत् । क्रध्यात् । क्रत्सीष्ट । अक्रधत् । अरौत्सीत् । अरोत्स्यत । अरोत्स्यति । क्षिदिर् विदारणे ॥ २ ॥ छिदिर् द्वैधीकरणे ॥ ३ ॥ युजिर् योगे ॥ ४ ॥ रिचिर् विरेचने ॥ ५ ॥ रिणक्ति । रिङ्क्ते । विरेच । रेक्ता । रेक्ष्यति । अरिणक् । अरिचत् । अरैक्षीत् । अरिक्त । विचिर् पृथग्भावे ॥ ६ । विनक्ति ।

विङ्क्ते । क्षुदिर । संप्रेषणे ॥ ७ ॥ क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत् । अक्षौत्सीत् । अक्षुत्त । उक्षृदिर दीप्तिदेवनयोः ॥ ८ ॥ छणत्ति । छृन्ते । चक्षर्द्ध ॥ सेसिचीति वेट चक्षृत्से । चक्षृदिषे । छर्द्धिता । छर्द्धिष्यति । छर्तस्यति । अक्षृदत् । अछर्दीत् । अछर्द्धिट । ओहदिर हिंसानादरयोः ॥ ९ ॥ हणन्ति । हन्ते । हतो वेटने ॥ १० ॥ हणन्ति । हन्ह हिंसि हिंसायाम् ॥ १२ ॥

हणह धूम् । ७ । ३९२ ॥

हन्हः श्नसि क्ङिते धूम् हलादौ पिति । हणोढि । हणद्ध । हतर्द्ध ॥ तर्हिता । अहणोट् । श्नाम्लोपः ॥ हिनस्ति । जिहिंस । हिंसिता । उन्दी क्लेदने ॥ १३ ॥ उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत । औन्ताम् । औन्दाम् । औन्दन् । औनः । औनद्म् । अञ्च व्यक्तिम्रक्षणकान्तिगतिषु ॥ १४ ॥ अनक्ति । अङ्क्त । अञ्चन्ति । आनञ्च । आनञ्चिथ । आनङ्क्थ । अञ्चिता । अङ्क्ता । अङ्क्षि । अनजानि । आनक् ॥

अञ्जेःसिचि । ७ । २ ।७१ ॥

अञ्जे स्सिचोनित्यमिट् । याञ्जीत् । तञ्चू संकोचने ॥ १५ ॥ तनक्ति । तङ्क्ता । तञ्चिता । ओविजी भयचलनयोः ॥ १६ ॥ विनक्ति विङ्क्तः । विज इड़िति ङित्वम् । विविजिथ । विजिता । अविनक् । अविजीत् । शिष्ल्ट विशेषणे ॥ १७ ॥ शिनष्टि । शिंष्टः । शिंश्नन्ति । शिनक्षि । शिश्लेष । शिश्लेषिथ । श्लेष्टा । श्लेक्ष्यति । श्लेर्धिः । शिश्लिष्ट । शिनक्षाणि । अशिनट् । शिंक्ष्यात् । शिक्ष्यात् । अशिक्षत् । एवं पिष्ल्ट सञ्चूर्णने ॥ १८ ॥ भञ्जो आमर्दने ।

नश्चानलोपः । ६ । ४ । २३ ॥

नम: परस्य नस्य लोपस्स्यात् । भनक्ति । वभञ्जिथ । वभङ्क्थ । भङ्क्ता । भङ्क्ष्यि । अभाङ्क्षीत् । भुज पालनाभ्यवहारयोः ॥ २० ॥ भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ।

भुजोऽनवने । १ । ३ । ६६ ॥

तङानौ स्तः । ओदनम्भुङ्क्ते । अनवनेकिम् । सक्तून्भुनक्ति । जिहृष्वी दीप्तौ ॥ २१ ॥ हृष्ल्वे ।

दून्धाते । दून्धते । दून्त्से । दून्ध्वे । दून्धाञ्चक्रे । दून्धिता । दून्द्धास् । दून्धाताम् । दूनधै । ऐनद्ध । ऐन्धाताम् । ऐन्धाः । विद विचारणे॥२॥ विन्ते । वेत्ता ।

इति क्र्यादयः ॥

॥ तनादयः ॥

तनु विस्तारे ॥ १ ॥

तनादिकृञ्भ्यः उः । ३ । १ । ७९ ॥

श्नोऽपवादः । तनोति । तनुते । ततान । तेने । तनितांसि । तनितांसे । तनिष्यति । तनिष्यते । तनुताम् । अतनोत् । तनुयात् । तन्वीत । तन्यात् । तनिषीष्ट । अतनीत् । अतानीत् ।

तनादिभ्यस्तथासोः । २ । ४ । ७९ ॥

तनादेस्सिचो वा लुक् तथासोः । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । अतनिष्यत् । अतनिष्यत । षणु दाने ॥ २ ॥ सनोति । सनुते ।

ये विभाषा । ६ । ४ । ४३ ॥

अनसलोपो वा यादौ कङिति । सायात् । सन्यात् ।

जनसनखनां सञ्झलोः । ६ । ४ । ४२ ॥

एषामाकारस्सनि झलादौ ङिति । असात् । असनिष्ट । असायाः । असनिष्ठाः । क्षणु हिंसायाम् ॥ ३ ॥ क्षणोति । क्षणुते । ह्रयन्तेति न दृङ्निः । अक्षणीत् । अक्षत । अक्षणिष्ट । अक्षयाः । अक्षनिष्ठाः । क्षिणुय ॥ ४ ॥ उप्रत्यये लघूपधस्य गुणो वा । क्षिणोति । क्षेणोति । क्षेणिता । अक्षेणीत् । अक्षित । अक्षेणिष्ट । तृणु अदने ॥ ५ ॥ तृणोति । तर्णोति । तृणुते । तर्णुते । डुकृञ् । करणे ॥ ६ ॥

अत उत्सार्वधातुके । ६ । ४ । ११० ॥

कुरुतः ।

न अकुर्छ्रराम् । ८ । २ । ७९ ॥

अस्य कुर्छ्रोरुपधाया न दीर्घः । कुर्वन्ति ।

नित्यङ्करोतेः । ६ । ४ । १०८ ॥

करोतेः प्रत्ययोकारस्य नित्यं लोपो स्वोः । कुर्वः कुर्मः । कुरुते । चकार । चक्रे । कर्त्ता । करिष्यति । करिष्यते । करोतु । कुरुताम् । अकरोत् । अकुरुत ।

येे च । ६ । ४ । १०६ ॥

कृञ उलोपो यादौ प्रत्यये । कुर्य्यात् । कुर्व्वीत । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । अकरिष्यत् । अकरिष्यत ।

व्यवपरिभ्योः कृञो भूषणे । ६ । १ । १३७ ॥

सम्भवाये च । ६ । १ । १३८ ॥

सुट । संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्व्वन्ति । संघोभवन्तीत्यर्थः । सम्पूर्वस्य कचिद्भूषणेऽपि सुट् । संस्कृतभक्ष्या इति ज्ञापकात् ।

उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ॥

कृञः सुट् । चात्पागुक्तयोरर्थयोः । प्रतियत्नो-गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्याध्याहार आकांक्षैकदेशपूरणम् । उपस्कृता कन्या । उपस्कृता ब्राह्मणाः । एधोदकस्योपस्कुरुते । उपस्कृतं भुङ्क्ते । उपस्कृतं ब्रूते । वनु याचने ॥ ७ ॥ वनुते । ववने । मनु अववोधने ॥ ८ ॥ मनुते । मेने । मनिता ।

अनिष्यते । अनुताम् । अमनुत । मन्वीत । मनिषीष्ट ।
अमनिष्ट । अमनिष्यत ।

इति तनादयः ॥

॥ क्रयादयः ॥

डुक्रीञ् द्रव्यविनिमये । १ ।
क्र्यादिभ्यः श्ना । ३ । १ । ८१ ॥

श्नपोऽपवादः । क्रीणाति । द्वैहल्यधोः । क्रीणीतः ।
आभ्यस्तयोरातः । क्रीण्न्ति । क्रीणासि । क्रीणीथः ।
क्रीणीथ । क्रीणास्मि । क्रीणीवः । क्रीणीमः । क्रीणीते ।
क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे ।
क्रीणे । क्रीणीवहे । क्रीणीमहे । चिक्राय । चिक्रियतुः ।
चिक्रियुः । चिक्रेथ । चिक्रयिथ । चिक्रिये ।
क्रेता । क्रेष्यति । क्रेष्यते । क्रीणातु । क्रीणीतात् ।
क्रीणीताम् । अक्रीणात् । अक्रीणीत । क्रीणीयात् ।
क्रीणीत । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रष्ट ।
अक्रेष्यत् । अक्रेष्यत । प्रीञ् तर्पणे कान्तौ च ॥ २ ॥
प्रीणाति प्रीणीते । श्रीञ् पाके ॥ ३ ॥ श्रीणाति ।
श्रीणीते । मीञ् हिंसायाम् ॥ ४ ॥

ञिनुसीना । ८ । ४ । १५ ॥

उपसर्गस्थान्निमित्तात्परस्यैतयोर्णिस्थ णः स्यात् । प्रसीणाति । प्रसीणीते । सीनातीत्यादि । असौ । सिष्यतुः । असिषय । असाय । सिष्ये । साता । साखति । सीयात् । सासीष्ट । असासीत् । असासिष्टाम् । असास्त । षिञ् वन्धने ॥ ५ ॥ सिनाति । सिनीते । सिषाय । सिष्ये । सेता । स्कुञ् आसवने ॥ ६ ॥

स्तन्भुस्तुस्कुस्कन् भुस्कुन्भुस्कुञ्-
भ्यः ष्टुन्श्चु । ३ । १ । ८२ ॥

भ्यात् भ्या । स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट । स्तम्बादयश्चत्वारः सौत्राः सर्वे रोधनार्थाः परस्मैपदिनः ।

ष्टुत्वष्टुत्वानज्झौ । ३ । १ । ८३ ॥

स्तम्भ ।

ष्टुत्वष्टुत्वस्तु चस्तु चयुः चुस्तु चवर्ल्लृञ्चिभ्यः
श्रयुः । ३ । १ । ५८ ॥

चलेरजा ।

स्तृभ्नेः । ८ । ३ । ६७ ॥

स्तृभ्नेस्सौत्रस्य सस्य षस्स्यात् । व्यष्टभत् । अस्तभ्नीत् ॥ युज् बन्धने ॥ ७ ॥ युनाति । युनीते । योता । क्लूङ् शब्दे । ८ । क्लूनाति । क्लूनीते । क्लविता । हृञ् हिंसायाम् । ९ । हृणाति । हृणीते । द्रूञ् हिंसायाम् ॥ १० ॥ द्रूणाति । द्रूणीते । पूञ् पवने ।

षादीनां हलः । ७ । ३ । ८० ॥

पूञ् लूञ् स्तृञ् कृञ् वृञ् धूञ् सृटृटृक्टृ सृ
ऊ ऊ ऊ ऊ ऊ ऊ ऊ ऊ ऊ
जॄ घृध्वृ चृग्ट ज्यारौलीव्लीमीनाञ्चतुर्व्वि-
ऊ ऊ ऊ ऊ ऊ
धेः धिति ङ्झलः । पुनाति । पुनीते । पविता । लूञ् छेदने । १२ । लुनाति । लुनीते । स्तृञ् आच्छादने । १३ । स्तृणाति । षपूर्व्वाः खयः । तस्तार । तस्तरतुः । तस्तरे । स्तरिता । स्तरीता । स्तृणीयात् । स्तृणीत । स्तीर्य्यात् ॥

लिङ्सिचोरात्मनेपदेषु । ७ । २ । ४२ ॥

वृङ् वृञ्भ्यास्तदन्ताच्च परयोर्लिङ् सिचोरिच्चा स्यात्तङि ॥

ल लिङि । ७ । २ । ३९ ॥

वृत वृटौ लिङि न दीर्घः ॥ स्तरिषीष्ट । उञ्च । अनेन क्तिनम् ॥ स्तीर्षीष्ट । सिचि च परस्मैपदेषु । अस्तारीत् । अस्तारिष्टाम् । अस्तारिषुः । अस्तरिष्ट । अस्तीर्ष्ट । कृञ् हिंसायाम् ॥ १४ ॥ क्रणाति ॥ क्रणीते । चकार । चक्रे । वृञ् वरणे ॥ १५ ॥ वृणाति । वृणीते । ववार । ववरे । वरिता । वरीता । उदोष्ठ्यपूर्वस्य । वूर्यात् । वुरिषीष्ट ॥ वृषौष्ट । अवारीत् । अवारिष्टाम् । अवरिष्ट । अवरीष्ट ॥ अवूर्ष्ट । धूञ् कम्पने । १६ । धुनाति । धुनीते । धोता । धविता । अधावीत् । अधर्विष्ट । अधोष्ट । ग्रह उपादाने । १७॥ गृह्णाति । गृह्णीते । जग्राह । जगृहे ॥

ग्रहोऽलिटि दीर्घः । ७ । १ । ३७ ॥

एकाचो ॥

चुरादयः ॥

ग्रहेर्विच्छितखेटो दीर्घौ नतु लिटि । ग्रहीता । गृह्णातु ।

हलः शः शानज्झौ । २ । १ । ८३ ॥

हलः परस्य अण्ग्यानजादेर्यो हौ। गटहाण। ग्टच्छात्। ग्रहिषीष्ट। हयन्तेति न वृद्धिः॥ अग्रहीत्। अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषातान्। कुष निष्कर्षे ॥ १८ ॥ कुष्णाति। कोषिता। अश भोजने ॥ १९ ॥ अश्नाति। आश। अशिता। अशिष्यति। अश्नातु। अशान। सुष स्तेये ॥ २० ॥ सोषिता। सुषाण। ष्ठाऽवरोधने ॥ २१ ॥ जष्ठौ। वृङ् सम्भक्तौ ॥ २२ ॥ वृणीते। वरिषे। वरिढ्वे। वरिता। वरीता। अवरिष्ट। अवरीष्ट। अवृत।

इति क्र्यादयः॥

चुरादयः॥

चुर स्तेये ॥ १ ॥

सत्यापपाशरूपवीणातुलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ।३।१।२५॥

स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वम्। तिप् शवादि। गुणायादेशौ। चोरयति।

णिश्च । १ । ३ । ७४ ॥

णिजन्तादालनेपदं कर्तृगामिनि क्रियाफले ।
चोरयते । चोरयाञ्चक्रे । चोरयाञ्चक्राते । चोरयाञ्चक्रिरे । चोरयिता । चोर्य्यात् । चोरयिषीष्ट । णिश्रीति चङ् । गौ चङीति ह्रस्वः । चङ्परेऽनग्लोपे । कृत्यादिषु णेः । दीर्घो लघोरित्यभ्यासस्य दीर्घः । अचूचुरत् । अचूचुरत । कथ वाक्यप्रबन्धे ॥ २ ॥ अक्षोपः ॥

अचः परस्मिन् पूर्वविधौ । १ । १ । ५७ ॥

परनिमित्तोऽजादेशः स्थानिवत्स्थानिभूताच्चः पूर्वत्वेन दृष्टस्य विधौ कर्त्तव्ये । इति स्थानिवत्त्वान्नोपधाद्वृद्धिः । कथयति । अग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचकथत । गण संख्याने ॥ ३ ॥ गणयति ॥

ईच गणः । ७ । ४ । ९७ ॥

गणयतेरभ्यासस्य ईत् स्याच्चादञ्चङ् परे णौ ।
अजीगणत् । अजगणत् ॥

॥ इति चुरादयः ॥

ण्यन्ताः ।

स्वतन्त्रः कर्त्ता । १ । ४ । ५४ ॥

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् ।

तत्प्रयोजको हेतुश्च । १ । ४ । ५५ ॥

कर्तुः प्रयोजको हेतुसंज्ञः कर्त्तसंज्ञश्च ।

हेतुमति च । ३ । १ । २६ ॥

प्रयोजकव्यापारे ।

॥ सन्नन्ताः ॥

प्रेषणादौ च वाच्ये धातोर्णिच् । अवन्तम् प्रेरयति । आवयति ।

श्नोः पुयण् ज्यपरे । ७ । ४ । ८० ॥

सनि परे यदंगन्तदवयवस्य श्नोत ईत् स्यात् पवर्गयण् जकारेऽचर्णपरेषुगरतः । अचीभवत् ।

ष्ठा गतिनिवृत्तौ ।

अर्तिह्रीव्लीरी क्नूयीक्ष्माय्यातां पुङ णौ । ७ । ३ । ३६ ॥

स्थापयति ।

तिष्ठतेरित । ७ । ४ । ५ ॥

उपधायाश्च ङ् परे णौ । अतिष्ठिपत् । घट चेष्टायाम् ।

सितां ह्रस्वः । ६ । ४ । ९२ ॥

घटादीनां ज्ञपादिनाञ्च ह्रस्वः । घटयति । ज्ञप ज्ञाने ज्ञापने च । ज्ञपयति । अजीज्ञपत् ।

इति णिजन्तप्रक्रिया ।

सनन्ताः ।

धातोः कर्म्मणस्समानकर्तृकादिच्छायां वा । ३ । १ । ७ ॥

इषि कर्म्मणोधातोरिषिणैककर्तृकात्सन् वेच्छायाम् । मठ व्यक्तायां वाचि ।

सन्यङोः । ६ । १ । ९ ॥

सन्नन्तस्य यङन्तस्य च प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । सन्यतः । मठितुमिच्छति मिमठिषति । कर्म्मणः किम् । गमनेनेच्छति । समानकर्तृकात् किम् । शिष्याः पठंतिमीच्छति गुरुः । वाग्रहणाद्वाक्यमपि । लुङ्सनोर्घस्लृ ।

सः स्यार्द्धधातुके ॥ ७ ॥ ४ ॥ ४९ ॥

सस्य तः स्यात्सादावार्द्धधातुके । अत्तुमिच्छति

जिघत्सति । एकाच इति नेट् ॥

अज्झनगमां सनि । ६ । ४ । १६ ॥

अजन्तानां हन्तेरजादेश्च गमेश्च दीर्घो झलादौ सनि ॥

इको झल् । १ । २ । ९ ॥

इगन्ताज्झलादिः सन् कित् । ऋत इद्धातोः ।

कर्तुमिच्छति चिकीर्षति ॥

सनि ग्रहगुहोश्च । ७ । २ । १२ ॥

ग्रहेर्गुहेश्च गन्ताच्च सन इण् न स्यात् बुभूषति ॥

॥ इति सनन्ताः ॥

॥ यङन्ताः ॥

धातोरेकाचो हलादेः क्रियासमभि-

हारे यङ् । ३ । १ । २२ ॥

पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ् ।

गुणो यङ्लुकोः । ७ । ४ । ८२ ॥

अभ्यासस्य गुणो वक्ति यङ्लुकि च परतः ।
ङिदन्तत्वादात्मनेपदम् । पुनःपुनरतिघ्येन वा भवति ।
वोस्रूयते । वोस्रूयाञ्चक्रे । अवोभूयिष्ट ।

॥ यङ् लुगन्ताः ॥

नित्यङ्कौटिल्ये गतौ । ३ । १ । २३ ॥

गत्यर्थात् कौटिल्य एव यङ् नतु क्रियासमभिहारे ।

दीर्घोऽकितः । ७ । ४ । ८३ ॥

अकितोऽभ्यासस्य दीर्घो यङ्लुकोः । कुटिलं व्रजति । वाव्रज्यते ।

यस्य हलः । ६ । ४ । ४९ ॥

हलः परस्य यस्य लोप आर्द्धधातुके । आदेः परस्य । अतो लोपः । वाव्रजाञ्चक्रे । वाव्रजिता ।

रीगृदुपधस्य च । ७ । ४ । ९० ॥

ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः । वरीवृत्यते । वरीवृताञ्चक्रे । वरीवृतिता ॥

क्नुभाद्यिञु च । ८ । ४ । ३९ ॥

क्नुतं न । नरीवृत्यते । जरीगट्च्यते ।

॥ इति यङन्तप्रक्रिया ॥

यङ्लुगन्ताः ।

यङोऽचि च । २ । ४ । ७४ ॥

यङोऽचि प्रत्यये लुक् स्याच्चकारात्तं विनापि क्वचित्। अनैमित्तिकोऽयम्। अन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वम। अभ्यास कार्य्यम्। धातुत्वाल्लड़ादयः। शेषात् कर्त्तरीति परस्मैपदम् । चर्करीतञ्चेत्यदादौ पाठाक्कपो लुक्।

यङो वा । ७ । ३ । ९४ ॥

यङ् लुगन्तात् परस्य हलादेः पितस्सार्व्वधातुकस्येट् वा स्यात्। भ्रस्जोरिति निषेधो यङ्लुकि भाषायां न। वोभूतु तेतिक्ते इति छन्दसि निपातनात्। वोभवीति। वोभोति। वोभूतः। अदभ्यास्तात्। वोभुवति। वोभुवाञ्चकार। वोभवांबभूव। वोभविता। वोभविष्यति। वोभवीतु। वोभूतु। वोभूतात्। वोभूताद्। वोभुवतु। वोभूहि। वोभवानि॥ अवोभवीत्। अवोभीत्। अवोभूताम्। अवोभवुः। वोभूयात्। वोभूयाताम्। वोभूयुः। वोभूयात्। वोभूयास्ताम्। वोभूयासुः। गातिस्थेति सिचो लुक्। यङौ चेतीट्पक्षे गुणस्वाभित्वा नित्यत्वाद्गुक्। अवोभू-

वीत् । अवोभीत् । अवोभूताम् । अवोभूवुः अवोभविष्यत् ।

॥ इति यङ्लुगन्ताः ॥

॥ नामधातवः ॥

सुप आत्मनः क्यच् । ३ । १ । ८ ॥

दूषि कर्मण एषितुः सम्बन्धिनस्सुबन्तादिच्छायामर्थे क्यच् वा ।

सुपो धातुप्रातिपदिकयोः । २ । ४ । ७१ ॥

एतयोरवयवस्य सुपो लुक् ॥

क्यचि च । ७ । ४ । ३३ ॥

अवर्णस्य ईः । आत्मनः पुत्रमिच्छति पुत्रीयति ।

नः क्ये । १ । ४ । १५ ॥

क्यचि क्यङि च नान्तस्यैव पदं नान्यत् । ललोपः राजीयति । नान्तस्येति किम् । वाच्यति ह्वलि च । गीर्यति । पूर्यति । धातोरित्येव । नेह । दिवमिच्छति ॥ दिव्यति ।

क्यस्य विभाषा । ६ । ४ । ५० ॥

हलः परयोः क्यच् क्यङोर्लोपो वार्ङ्धातुके । आदेः परस्य । अतो लोपः । तस्य स्थानिवत्त्वाल्लघूपधगुणो न ॥ सन्निधिता । समिध्यिता ।

काम्यच्च । ३ । १ । ९ ॥

उक्तविषये काम्यच् । पुत्रमात्मन इच्छति । पुत्रकाम्यति । पुत्रकाम्यिता ।

उपमानादाचारे । ३ । १ । १० ॥

उपमानात् कर्मणस्तुवन्तादाचारेऽर्थे क्यच् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णुयति द्विजम् ।

सर्वप्रातिपदिकेभ्यः क्विब् वक्तव्यः । अतो गुणे । कृष्ण इवाचरति कृष्णति । स्व इवाचरति स्वति । सस्वौ ।

अनुनासिकस्य क्विब् झलोः क्ङिति । ६ । ४ । १५ ॥

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्ङौ झलादौ च क्ङिति । इदमिवाचरति - इदामति । राजेव राजायति । पन्या इव पथीयति ॥

कृष्णाय क्लमते । ३ । १ । १४ ॥

चतुर्यन्तात् कष्टशब्दादुत्साहे क्यङ् । कष्टाय क्रमते कष्टायते। पापङ्कर्त्तुमुत्सहत इत्यर्थः ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ।
३ । १ । १७ ॥

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् । शब्दङ्करोति शब्दायते ।

तत्करोति तदाचष्टे । इति णिच् ॥

प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च । प्रातिपदिकाद्धात्वर्थे णिच् स्यात् । इष्टे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुप् लोपयणादिलोप प्रत्ययस्वाद्यादेश भसंज्ञास्वहल्लक्षणावपि स्युः । इत्यग्लोपः । वटङ्करोत्याचष्टे वा वटयति ॥

॥ इति नामधातवः ॥

॥ कण्ड्वादयः ॥

कंण्ड्वादिभ्यो यक् । ३ । १ । २७ ॥

एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे । कण्ड्वज गात्रविघर्षणे ॥ १ ॥ कण्ड्वयति । कण्ड्वयते । इत्यादि ।

॥ इति कंण्ड्वादयः ॥

॥ आत्मनेपदम् ॥

कर्त्तरि कर्मव्यतिहारे । १ । ३ । १४ ॥

क्रियाविनिमये द्योत्ये कर्त्तर्यात्मनेपदम् । व्यतिलुनीते । अन्यस्य योग्यं लवनं करोतीत्यर्थः ॥

न गतिहिंसार्थेभ्यः । १ । ३ । १५ ॥

व्यतिगच्छन्ति । व्यतिघ्नन्ति ॥

नेर्विशः । १ । ३ । १७ ॥

निविशते ॥

परिव्यवेभ्यः क्रियः । १ । ३ । १८ ॥

परिक्रीणीते । विक्रीणीते । अवक्रीणीते ॥

विपराभ्यां जेः । १ । ३ । १९ ॥

विजयते । पराजयते ॥

समवप्रविभ्यः स्थः । १ । ३ । २२ ॥

सन्तिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥

अपह्नवे ज्ञः । १ । ३ । ४४ ॥

शतमपजानीते । अपलपतीत्यर्थः ।

अकर्मकाच्च । १ । ३ । ४५ ॥

सर्पिषो जानीते । सर्पिषोपायेन प्रवर्त्तत इत्यर्थः ॥

सनस्तीयायुक्तात् । १ । ३ । ५४ ॥

रथेन सञ्चरते ।

दात्रञ्च सा चेच्चतुर्थ्यर्थे । १ । ३ । ५५ ॥

सनोंदाणस्तृतीयान्तेन युक्तादुतं स्यात् तृतीया चेच्चतुर्थ्यर्थे । दात्रा संयच्छते कासी ।

पूर्ववत्सनः । १ । ३ । ६२ ॥

सनः पूर्वो यो धातुस्तेन तुल्यं सनन्तादप्यात्मने-पदं स्यात् । एदिधिषते ।

हलन्ताच्च । १ । ३ । १० ॥

हलन्तसीयाद्धलः परो झलादिः सन् ङित् निवि-वित्सते ॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषुकृञ्चः । १ । ३ । २२ ॥

गन्धनं सूचनम् । उत्कुरुते सूचयतीत्यर्थः । अवक्षेपणं अर्त्सनम् । ग्रेनोवर्त्तिकामुत्कुरुते अर्त्-सयतीत्यर्थः । हरिमुपकुरुते । सेवत इत्यर्थः । परदा-रान् प्रकुरुते । तेषु सहसा प्रवर्त्तते । एवोदकस्यो-पस्कुरुते । सुखमावर्त्तते । कथाः प्रकुरुते । कथय-

तीत्यर्थः । शतमुपकुरुते । शतार्धं विनिवङ्क्ते । एषु किम् । कटङ्करोति । ओदनभुङ्क्ते । अनवने किम् । सक्तूं भुनक्ति ।

॥ इत्यात्मनेपदप्रक्रिया ॥

परस्मैपदम् ॥

अनुपराभ्यां कृञः । १ । ३ । ७९ ॥

कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् । अनुकरोति । पराकरोति ॥

अभिप्रत्यतिभ्यः क्षिपः । १ । ३ । ८० ॥

क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति ॥

प्राद्वहः । १ । ३ । ८१ ॥

प्रवहति ।

परेर्मृषः । १ । ३ । ८२ ॥

परिमृष्यति ॥

व्याङ् परिभ्यो रमः । १ । ३ । ८३ ॥

रमु क्रीडायाम् । विरमति ।

उपाच्च । १ । ३ । ८४ ॥

यच्छदन्त सुपरसति । उपरमयतीत्यर्थः अन्तर्भावितण्यर्थोऽयम् ।

॥ इति पदव्यवस्था ॥

भावकर्म ॥

भावकर्मणोः । १ । ३ । १३ ॥

लक्ष्यात्मनेपदम् ॥

सार्वधातुके यक् । ३ । १ । ६७ ॥

भावकर्मवाचिनि धातोर्यक् सार्वधातुके । भावः क्रिया ला च भावार्थक लकारेणानूद्यते । युष्मद्स्मद्भ्यां सामानाधिकरण्याभावात् प्रथमः पुरुषः । तिङ् वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि क्रियैकवचन मेवोत्सर्गतः । त्वया मया अन्यैश्च क्रियते । वक्ष्यते ॥

स्यसिच्सीयुट् तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ।

६ । ४ । ६२ ॥

उपदेशे योऽच् तदन्तानां हनादीनाञ्च चिण्वाङ्कार्यं वा स्यात् स्यादिषु भावकर्मणोर्नेयमानयोः

स्वादीनामिड़ागमश्च। चिण्वज्ञाव पत्तेऽयमिट्। चिण्व-
ज्ञावाहृञ्ञिः । आविता । अविता । आविष्यते । अवि-
ष्यते । स्नुयताम् । अस्नुयत । आविषीष्ट । अविषीष्ट ॥

चिण् भावकर्म्मणोः । ३ । १ । ६६ ॥

चलेश्चिण् स्वाङ्गावकर्म्मवाचिनि ते परे।
अभावि । अभाविष्यत । अभविष्यत । अकर्म्मकोप्युप-
सर्गवशात् सकर्म्मकः । अनुभूयते आनन्देनैतेन त्वया
मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे ।
अहमनुभूये । अन्वभावि । अन्वभाविषाताम् । अन्व-
भविषाताम् । णि लोपः । भाव्यते । भावयाञ्चक्रे ।
भावयाञ्चभ्रे । भावयामासे । चिण्वदिट् । भाविता ।
आभीयत्वेनासिद्धत्वान्नि लोपः । भावयिता । भाव-
यिषीष्ट । अभावि । अभाविषाताम् । अभावयिषा-
ताम् । बुभूष्यते । बुभूषाञ्चक्रे । बुभूषिता । अबूभि-
ष्यते । वोभूयते । वोभूयिष्यते । अकृत्सार्वधातु-
कयोर्दीर्घः । स्तूयते विष्णुः । स्तविता । स्तोता ।
स्तविष्यते । स्तोष्यते । अस्तावि । अस्तविषाताम् ।
अस्तोषाताम् । ऋ गतौ । गुणोऽर्त्तीति गुणः ।
अर्य्यते । स्म सारणे । स्मर्य्यते । सस्मरे । उपदेश-

अहणाच्चिण्वदिट् । आरिता । ऋर्त्ता । स्वारिता । स्वर्त्ता । अनिदितामिति न लोपः । स्वर्य्यते । दूदितस्तु । नन्द्रयते सम्प्रसारणम् । दून्द्र्यते ॥

तनोतेर्यकि । ६ । ४ । ४४ ॥

आदन्तादेशो वा । तायते । तन्यते ॥

तपोऽनुतापे च । ३ । १ । ६५ ॥

तपश्चेच्चिण् न स्यात् कर्म्म कर्त्तव्यनुतापे च । अच्चतप्त पापेन । घुमास्थेतीत्वम् । दीयते । धीयते । ददे ॥

आतो युक् चिण् कृतोः ॥७।३।३३॥

आदन्तानां युगागमश्चिणि ञ्णिति कृति च । दायिता । दाता । दायिषीष्ट । दासीष्ट । अदायि । अदायिषाताम् । अज्यते ।

अंजेश्च चिणि ।६।४।३३॥

न लोपो वा । अभाजि । अभञ्जि । लभ्यते ॥

विभाषा चिण्णमुलोः ।७।१।६८ ॥

लंभेर्नुम् । अलम्भि । अलाभि ॥

इति भावकर्म्मप्रक्रिया ॥

॥कर्मकर्त्तरि ॥

यदा कर्मैव कर्त्तृत्वेन विवक्षितं तदा स्वकर्मकाणामप्यकर्मकत्वात् कर्त्तरि भावे च लकारः ॥

कर्मवत् कर्मणा तुल्यक्रियः ।३।१।८७॥

कर्म्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्म्मवत् स्यात् । कार्य्यातिदेशोऽम् । तेन यगात्मनेपदचिण् चिणवद्दिटस्युः । पच्यते फलम् । भिद्यते काष्ठम् । अपाचि । अभेदि भावे । भिद्यते काष्ठेन ।

इति कर्मकर्त्तरि प्रक्रिया ॥

लकारार्थः ॥

श्रौ वा स्यात्

श्रौ ।३।१ र्ं ल्लट् । ३ । २ । ११२॥

स्मृतिवोधिन्वुपपदे स्मृतानद्यतने धातोर्ल्लट । लङोऽपवादः ॥ वस निवासे । स्मरसि कृष्ण गोकुले वत्स्यामः । एवं वुध्यसे चेतसे । इत्यादि प्रयोगेऽपि ॥

न यदि । ३ । २ । ११३ ॥

यद्योगे उक्तं न । अभिजानासि यद्वने अभुञ्जसहि ।

लट् स्मे । ३ । २ । ११८ ॥

लिटोऽपवादः । यजतिस्म युधिष्ठिरः ॥

वर्त्तमानसामीप्ये वर्त्तमानवद्वा ।३।३। १३१ ॥

वर्त्तमाने ये प्रत्यया उक्तास्ते वर्त्तमानसामीप्ये भूते भविष्यति च वा स्युः ॥ कदागतोऽसि । अयमागच्छामि । आगमं वा । कदागमिष्यसि । एष गच्छामि । गमिष्यामि वा ॥

हेतुहेतुमतोर्लिङ् । ३ । ३ । १५६ ॥

वा स्यात् । क्षणं नलेच्चेत्[illegible] । दासीष्ट । यते । नेच्छ । च्छतीति पलायते । विधिनिमन्त्रणामन्त्रितेषु लिङ् । विधिः प्रेरणम् । स्वत्यादेर्निकटस्य प्रवर्त्तनम् । यजेत । निमन्त्रणम् नियोगकरणम् । आवश्यके आङ्भोजनादौ दौहित्रादेः प्रवर्त्तनम् । इह भुञ्जीत । आमन्त्रणङ्गौरवचारणमनुज्ञा ॥ अहासीत् । अधीष्टः सत्कारपूर्व्वको व्यापारः । भुक्तवध्यापयेत् भवान् । सम्प्रश्नः सम्प्रधारणम् । किन्नो वेदमधीयीय उत तर्कम् ।

प्रार्थनम् । याच्ञा । भो भोजनं लभेय । एवम् लोट् ॥

इति लकारार्थप्रक्रिया ॥

इति तिङन्तप्रक्रिया समाप्ता ॥

कृदन्ताः ॥

धातोः । ३ । १ । ९१ ॥

आदितीयान्ताः ये प्रत्यया ते धातोः परे स्युः ।

कृदतिङिति कृत्संज्ञा ॥

वाऽसरूपोऽस्त्रियाम् । ३ । १ । ९४ ॥

अस्मिन्धात्वधिकारेऽसरूपो ऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्वाधिकारोक्तस्त्रिना ॥

क्त्वाः ५ ३ । १ । ९५ ॥

एवुलतृचावित्यंतः प्राक् कृत्य संज्ञाः स्युः ॥

कर्त्तरि कृत् । ३ । ४ । ९७ ॥

इति प्राप्ते ॥

तयोरेव कृत्यक्तखलर्थाः । ३ । ४ । ७० ॥

एते भावकर्मणोरेव स्युः ॥

तव्यत्तव्यानीयरः । ३ । १ । ९६ ॥

धातोरेते स्युः । एधितव्यम् ॥ एधनीयं त्वया ।
वा घर्म्यस्वया । केलिसर उपसंख्यानम् । पचेलिमा । माषाः
पक्तव्या इत्यर्थः । भिदेलिमाः सरलाः । भेत्तव्याः ।
कर्मणि प्रत्ययः ॥ कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ॥

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचि-
दन्यदेव । विधेर्विधानबहुधा समीक्ष्य चातुर्विधा-
बाहुलकं वदन्ति । १ । स्नात्वनेनेति स्नानीयं
चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ॥

अचो यत् । ३ । १ । ९७ ॥

चेयम् ॥

ईद्यति । ६ । ४ । ६५ ॥

यति परे आत ईत् स्यात् । देयम् । ग्लेयम् ॥

पोरदुपधात् । ३ । १ । ९८ ॥

पवर्गान्तादुपधाद्यत् । एतोऽपवादः । शप्यम् ।
लभ्यम् ।

एतिस्तुशास्वृदृजुषः क्यप् । ३ । १ । १०९ ॥

एत्यः क्यप् ।

हृस्वस्य पिति कृति तुक् । ६ । १ । ७१ ॥

इत्यः । स्तुत्यः । शास्तु अनुशिष्टौ ॥

शास इदङ्हलोः । ६ । ४ । ३४ ॥

शास उपधाया इत्स्याद्ङि हलादौ क्ङितिच ।

शिष्यः । दृत्यः । आहृत्यः । जुष्यः ।

स्तृजेर्विभाषा । ३ । १ । ११३ ॥

स्तृजेः क्यप् वा । स्तृत्यः ।

ऋहलोर्ण्यत् । ३ । १ । १२४ ॥

ऋवर्णान्ताद्धलन्ताच्च ण्यत् ॥ कार्य्यम् । हार्य्यम् ।

धार्य्यम् ॥

चजोः कुघिण्यतोः । ७ । ३ । ५२ ॥

चजोः कुत्वं स्यात् घिति ण्यति च ॥

स्तृजेर्वृद्धिः । ७ । ३ । ११४ ॥

स्तृजेरिको वृद्धिः सार्वधातुकार्द्धधातुकयोः

स्तार्य्यः ॥

ओज्यस् सख्ये । ७ । ३ । ६६ ॥

ओग्यसन्यत् ॥

॥ इति कृत्यप्रक्रिया ॥

ण्वुल् तृचौ। ३। १। १३३॥

धातोरेतौ स्तः। कर्त्तरि कृदिति कर्मणि।

युवोरनाकौ। ७। १। १॥

युवु एतयोरनाकौ स्तः। कारकः। कर्त्ता॥

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। ३।

१। १३४॥

नन्द्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच्। नन्दय-

तीति नन्दनः। जनार्दनः। लवणः। ग्राही। स्थायी।

मन्त्री। पचादिराकृतिगणोऽयम्।

इगुपधज्ञाप्रीकिरः कः। ३। १। १३५॥

एभ्यः कः। वृषः। कृष्णः। ज्ञः। प्रियः। किरः॥

आतश्चोपसर्गे। ३। १। १३६॥

प्रज्ञः। सुग्लः॥

गेहे कः। ३। १। १४४॥

गेहे कर्त्तरि ग्रहेः कः स्यात्। गृहम्॥

कर्मण्यण्। ३। २। १॥

कर्मण्युपपदे धातोरण्। कुम्भङ्करोति कुम्भ-

कारः।

आतोऽनुपसर्गे कः । ३ । २ । ३ ॥

क्ष्णोऽपवादः । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम् । गोसम्प्रदायः ।

मूलविभुजादिभ्यः कः । मूलानि बिभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । मद्दीभ्रः कुम्भ्रः ।

चरेष्टः । ३ । २ । १६ ॥

अधिकरणे उपपदे । कुरुचरः ।

भिक्षासेनादायेषु च । ३ । २ । १७ ॥

भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः ।

कृञो हेतुताच्छील्यानुलोम्येषु । ३ । २ । २० ॥

एषु द्योत्येषु करोतेष्टः ।

अतः कृकमिकंसकुम्भपात्रकुलाकर्णीषु नव्ययस्य । ८ । ३ । ४६ ॥

आदुत्तरस्यानव्ययस्य विसर्गस्य सकारादेशः करोत्यादिषु परेषु । यशस्करी विद्या । आशङ्करः । वचनङ्करः ।

एजेः खश् । ३ । २ । २८ ॥

ण्यन्तादेजेः खश् ।

अरुर्द्विषदजन्तस्य मुम् । ६ । ३ । ६७ ॥

अरुषो द्विषतोऽजन्तस्य च मुमागमः. खिदन्ते परे नलोपश्च । शित्त्वाच्छ्वादिः । जनमेजयतीति जनमेजयः ।

प्रियवशे वदः खच् । ३ । २ । ३८ ॥

प्रियंवदः । वशंवदः ।

आत्ममाने खश्च । ३ । २ । ८३ ॥

स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात् चाणिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः । पण्डितमानी ।

अन्येभ्योऽपि दृश्यन्ते । ३ । २ । ७५ ॥

मनिन् क्वनिप् वनिप् विच् एते प्रत्ययाः धातोः स्युः ।

नेड्वशि कृति । ७ । २ । ८ ॥

वशादेः क्ङितः । इण् न । घृ क्षिंसायाम् । सुधर्मा । मातरिश्वा ।

विड्वनोरनुनासिकस्यात् । ६ । ४ । ४१ ॥

अनुनासिकस्यात् स्यात् । विज़ायंत इति विजावा ।

ओण अपनयने। अवावा। विच्। ऋष् रिष् हिंसा-
याम्। रोट्। रैट। सुगण्।

क्विप् च। ३। २। ७६॥

अयमपि दृश्यते। उखास्रत्। घर्णंध्वत्। वाहभ्राट्।
सुप्यजातौ णिनिस्ताच्छील्ये। ३। २। ७८॥

अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये।
उष्णभोजी।

मनः। ३। २। ८२॥

सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी।

खित्यनव्ययस्य। ६। ३। ६६॥

पूर्वपदस्य ह्रस्वः। कालिम्मन्या।

कारणे यजः। ३। २। ८५॥

कारणे उपपदे भूतार्थयजेर्णिनिः कर्त्तरि।
सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी।

दृशेः क्वणिप्। ३। २। ९४॥

कर्म्मणि सूते। पारं दृष्टवान्। पारदृश्वा।

राजनि युधिकृञः। ३। २। ९५॥

क्वनिप्। युधिरन्तर्भावितण्यर्थः। राजानं योधित-
वान् राजयुध्वा। राजकृत्वा।

सहे च । ३ । २ । ९६ ॥

सह योधितवान् सह्युध्वा । सहक्त्वा ।

सप्तम्याञ्जनेर्डः । ३ । २ । ९७ ॥

तत्पुरुषे कृति बहुलम् । ६ । ३ । १४ ॥

ऊरलुक् । सरसिजम् । सरोजम् ।

उपसर्गे च संज्ञायाम् । ३ । १ । ९९ ॥

प्रजा स्यात् सन्ततौ जने ।

क्त क्तवतू निष्ठा । १ । १ । २६ ॥

एतौ निष्ठा संज्ञौ स्तः ।

निष्ठा । ३ । २ । १०२ ॥

भूतार्थवृत्तेर्धातोर्निष्ठा । तत्र तयोरेवेति भाव-कर्मणोः क्तः । कर्तरि वृद्धिति कर्तरि क्तवतुः । स्नातस्त्वया । स्नुतस्त्वया विष्णुः । विश्वं कृतवान् विष्णुः ।

रदाभ्यां निष्ठातौ नः पूर्वस्य च दः ।

८ । २ । ४२ ॥

रादाभ्यान्परस्य निष्ठातस्य नः निष्ठापेक्षया

पूर्वस्य धातोर्दस्य च । ग्रह हिंसायाम् । ग्रीर्णः ।
भिन्नः । छिन्नः ।

संयोगादेरातोधातोर्यण्वतः ।८।२।४३॥

निष्ठातस्य नः स्यात् । द्राणः । ग्लानः ।
लादिभ्यः । ८ । २ । ४४ ॥

एकविंशतेर्लूजादिभ्यः क्त्रिवत् । लूनः । ज्या
धातुः । ग्रहिज्येति सम्प्रसारणम् ।
हलः । ६ । ४ । २ ॥

अङ्गावयवाद्धलन्तपर यत्सम्प्रसारणान्तदन्तस्य
दीर्घः । जीनः ।
आदितश्च । ८ । २ । ४५ ॥

भुजो । भुग्नः । टु ओश्वि । उच्छूनः ।
शुषः कः । ८ । २ । ५१ ॥

निष्ठातस्य । शुष्कः ।
पचोवः । ८ । २ । ५३ ॥

पक्वः । वै हर्षक्षये ।
क्षायो मः । ८ । २ ५३ ॥

क्षामः ।
निष्ठायां सेटि । ६ । ४ । ५२ ॥

गोलौमः । आवितः । आवितवान् । ह्रिह्रि हिंसायाम् ।

ह्रिह्रः स्यूस्नलयोः । ७ । २ । २० ॥

स्यूते वलवति च निपात्यते ।

दधातेर्हिः । ७ । ४ । ४२ ॥

तादौ किति । हितम् ।

दो दद्घोः । ७ । ४ । ४६ ॥

घुसंज्ञकस्य दा इत्यस्य दय् तादौ किति । चर्त्वम् । दत्तः ।

क्तिटः क्तानज्वा । ३ । २ । १०६ ॥

क्तवतुश्च । ३ । २ । १०७ ॥

लिटः क्तानच् क्वसू वा स्तः । तङानावात्मनेपदम् । चक्राणः ।

क्ष्वोश्च । ८ । २ । ६५ ॥

मान्तस्य धातोर्नुत्वं क्ष्वोः परतः । जसन्वान् ।

लटः शतृशानचावप्रथमासमानाधिकरणे । ३ । २ । १२४ ॥

अप्रथमान्तेन समानाधिकरणे लट् एतौ वा स्तः । ध्यवादिः । पचन्तश्चैत्रमध्य ।

आने मुक् । ७ । २ । ८२ ॥

अदन्ताङ्गस्य । पचमानश्चैत्रमग्रं । लडित्यनुवर्त्तमाने ।

पुनर्ग्रहणात् प्रथमासमानाधिकरणेऽपि क्वचित् । सन् द्विजः ॥

विदेश्शतुर्वसुः । ७ । १ । ३६ ।

वेत्तेः परस्य शतुर्वसुरादेशो वा । विदन् । विद्वान् ॥

तौ सत् । ३ । २ । १२७ ॥

तौ शतृशानचौ सत्संज्ञौ स्तः ॥

लटः सद्वा । ३ । ३ । १४ ॥

करिष्यन्नङ्करिष्यमाणम्वस्य ॥

आक्रोशेऽच्छीलतद्धर्म्मतत्साधुकारिषु । ३ । २ । १३४ ॥

क्षिपमभिव्याप्य वक्ष्यमाणास्तच्छीलादिषु कर्तृषु बोध्याः ।

तृन् । ३ । २ । १३५ ॥

कर्त्ता कटान् ॥

जल्पिभिक्षकुट्टलुण्टवृङः षाकन् । ३ । २ । १४५ ॥

षः प्रत्ययस्य । १ । २ । ६ ॥

षप्रत्ययस्यादिः षः इत्संज्ञः स्यात् । जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः ॥

सनाशंसभिक्ष उः । ३ । २ । १६८ ॥

चिकीर्षुः । आशंसुः । भिक्षुः ॥

राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । ३ । १ । ११४ ॥

विजादयः । राः ॥

वाजोषधेः । ५ । १ । २१ ॥

रेफाच्छोलोपः औ ऋलादौ ङिति च । धूः । विद्युत् । जत्रौ । पूः । हविष्यन्नस्यामकर्षाज्जवते-र्वः । जूः । आवस्तुत् ।

क्विब्वचिप्रच्छिश्रायतस्तुकटप्रुजुश्रीयान्द्रीर्वोऽस्वप्न-प्रस्वरणञ्च । वक्तीति वाक् ॥

स्त्रीः प्रत्ययनुबाम्बिके च । ६ । ४ । १९ ॥

स्तुकस्य च्छस्य वस्य च क्रमात् घछठ् एता वादेशौ स्त्रः स्त्रीः औ अनुनासिकादौ ऋलादौ ङिति । तिच्-

इच्छतीति प्राट् । आयतं स्रौति आयतस्रूः । काट-
म्रवते काटम्रूः । जुक्ताः । अयति हरिं श्रीः ॥

दात्रीशसयुयुजस्तुदसिसिचमिहपत-
दशनहः करणे । ३ । २ । १८२ ॥

दावादेः ष्ट्रन् स्यात् करणेऽर्थे । दात्यनेन दात्रम् ॥

तितुत्रतथसिसुसरकसेषु च । ७।३।९॥

एषान्दशाकानिख् च । शस्त्रम् । योत्रम् ।
योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् ।
नेद्रम् । पत्रम् । दंष्ट्रा । वर्त्री ।

अर्तिलूधूसूखनसहचर इत्रः । ३ । २ ।
१८४ ॥

अरित्रम् । लवित्रम् । धवित्रम् । सवित्रम् ।
खनित्रम् । सहित्रम् । चरित्रम् ।

पुवः संज्ञायाम् । ३ । २ । १८५ ॥

पवित्रम् ।

॥ अधोणादृयः ॥

ऋवापाजिमिस्वदिसाध्यशूभ्य उण् ॥

कारोतीति कारुः । वायुः । पायुर्गुदम् । जायुरौषधम् । मायुः पित्तम् । स्वादुः । साध्नोति परकार्य्यमिति साधुः । आशु शीघ्रम् ।

उणादयो बहुलम् । ३ । ३ । १ ॥

एते वर्त्तमाने संज्ञायाञ्च बहुलं स्युः । केचिदविहिता अप्यूह्याः । संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्य्याविज्ञानबन्धमेतच्छास्त्रमुणादिषु ।

तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम् । ३ । ३ । १० ॥

क्रियार्थायां क्रियायामुपपदे अविष्यत्यर्थे वातोरेतौ स्तः । सान्तत्वादव्ययत्वम् । कृष्णं द्रष्टुं याति । कृष्णं द्रष्टुकामो याति ।

कालसमयवेलासु तुमुन् । ३ । ३ । १६७ ॥

कालः समयो वेला वा भोक्तुम् ।

आशिषि । ३ । ३ । १७३ ॥

चिङ्कावस्यामन्ये धात्वर्थे वाच्ये धातोर्घञ् । पाक॥ :

अकर्त्तरि च कारके संज्ञायाम् ।३।३।१९।

कर्त्तृभिन्ने कारके घञ् ।

घञि च भावकरणयोः । ६ । ४ । २७ ॥

रञ्जेर्नलोपश्चात् । रागः । अनयोः किम् ॥

रज्यत्यस्मिन्निति रङ्गः ।

निवासचितिशरीरोपसमाधानेष्वादेश्च

कः । ३ । ३ । ४१ ॥

एषु चिनोतेर्घञ् आदेश्च कः । उपसमाधानं

राशीकरणम् । निकायः । कायः । गोसयनिकायः ॥

हरतेश्च । ३ । ३ । ५६ ॥

इवर्णान्तात् । चयः । जयः ।

हृदोरप् । ३ । ३ । ५७ ॥

ऋवर्णान्तादुवर्णान्ताच्चाप् । करः । गरः ।

यवः । स्तवः । लवः । पवः । घञर्थे क विधानम् ।

प्रस्थः । विघ्नः ॥

ड्वितः क्त्रिः । ३ । ३ । ८८ ॥

क्त्रेर्म्मस् नित्यम् ॥ क्त्रिप्रत्ययान्तात् मम् निर्वृत्ते-

ऽर्थे । पाकेन निर्वृत्तं पक्त्रिमम् । डुवप् उप्तिमम् ।

ह्वेतोऽच् । ३ । ३ ।८८ ॥

हुवेष्ट वक्ष्यते । वेषयुः ।

यजयाचयतविच्छप्रच्छरक्षोनङ् । ३ ।
३ । ८९ ॥

यज्ञः । याञ्ञा । यत्नः । विघ्नः । प्रश्नः । रक्षणः ॥

क्यपो लन् । ३ । ३ । ९० ॥

स्वप्नः ।

उपसर्गे घोः किः । ३ । ३ । ९१ ॥

अधिः । उपधिः ।

स्त्रियां क्तिन् । ३ । ३ । ९४ ॥

स्त्रीलिङ्गे भावे क्तिन् । यज्ञोऽपवादः । कृतिः ।
स्तुतिः ।

गुरोश्चाद्यिष्यः क्तिन्निष्ठावद्वाच्यः । तेन नत्वम् ।
शीर्तिः । लूनिः । धूनिः । पूनिः ।

सम्पदादिभ्यः क्विप् । सम्पत् । विपत् । आपत् ।
क्तिन्नपीष्यते । सम्पत्तिः । विपत्तिः । आपत्तिः ।

जनियूतिजूतिसातिहेतिकीर्तयश्च । ३ ।
३ । ९७ ॥

एते निपात्यन्ते ।

ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च । ६ ।

। ४ । २० ॥

एषामुपधावकारयोरूठ अनुनासिके की
औत्वादङ्डिति च । जतिः । क्विप् । जूः । तूः ।
स्नूः । जः । गः ।

दूङ्का । ३ । ३ । १०१ ॥

दूपेर्च्चिपातोऽयस् ।

ङ्रः प्रत्ययात् । ३ । ३ । १०२ ॥

प्रत्ययान्तेभ्यः स्त्रियामकारः प्रत्ययस्स्यात् ।
चिकीर्षा । पुत्रकाम्या ।

गुरोश्च हलः । ३ । ३ । १०३ ॥

गुरुमतो हलन्तात् स्त्रियाम् प्रत्ययः । ईङ्ा ।

एषासश्चन्यौ युच् । ३ । ३ । १०७ ॥

अकारस्यापवादः । कारणा । हारणा ।

नपुंसके भावे क्तः । ३ । ३ । ११४ ॥

ल्युट् च । ३ । ३ । ११५ ॥

स्मितम् । हसनम् ।

पुंसि संज्ञायां घः प्रायेण ।३।३।११८ ॥

छादेर्घेऽद्व्युपसर्गस्य। ६।४।९६॥

द्विरुत्युपसर्गहीनस्य छादेर्घेऽङौ परे। दन्त-च्छदः। नासिकाच्छदः।

अवितृस्वोर्घञ्। ३।३।१२०॥

अवतारः। अवतारो जवनिका।

हलश्च। ३।३।१२१॥

हलन्ताद्धातोर्घञ्। घापवादः। रमन्ते योगिनो ऽस्मिन्निति रामः। अपच्छद्यतेऽनेन व्याध्यादि-रित्यपामार्गः।

ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्। ३।३। १२६॥

एषु दुःखसुखार्थेषूपपदेषु खल्। तयोरेवेति भावे कर्मणि च। कृच्छ्रे। दुष्करः कटो भवता। सुकरे। ईषत्करः। सुकरः।

आतो युच्। ३।३।१२८॥

खलोऽपवादः। ईषत्मानः स्रोमो भवता। दुष्मानः। सुमानः।

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। ३। ४।१८॥

प्रतिषेधार्थयोरलंखल्वोरूपपदयोः क्त्वा । दो ददघो । अलन्दत्त्वा । धुमास्थेतीत्वम् । पीत्वा खलु । अलंखल्वोः किम् । मा कार्षीत् । प्रतिषेधयोः किम् । अलङ्कारः ।

समानकर्तृकयोः पूर्वकाले ।३।४।२१॥

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा । स्नात्वा व्रजति । हित्वमतल्लक्षम् । सुक्त्वा पीत्वा व्रजति ।

न क्त्वा सेट् । १ । २ । १८ ॥

सेट क्त्वा किन्न स्यात् । श्वयित्वा । सेट् किम् । क्त्वा ॥

रलोव्युपधाद्धलादेः संश्च । १ । २ । २६ ॥

इवर्णोवर्णोपधाद्धलादेरलन्तात्परौ क्त्वा सनौ सेटौ वा कितौ स्तः । द्युतित्वा । द्योतित्वा । लिखित्वा । लेखित्वा । व्युपधात् किम् । वर्त्तित्वा । रलः किम् । सेवित्वा । हलादेः किम् । एधित्वा । सेट् किम् । भुक्त्वा ।

उदितो वा । ७ । २ । ५६ ॥

उदितः परस्य क्त्वा इड्वा । शमित्वा । शान्त्वा । देवित्वा । द्यूत्वा । दधातेर्हिः । हित्वा ।

जहातेश्च । ७ । ४ । ४३ ॥

हित्वा । हाङ्खा हात्वा ।

समासेऽनञ् पूर्वे क्तो ल्यप् ।७।१।३७ ॥

अव्ययपूर्वपदेऽनञ् समासे क्तो ल्यबादेशः । तुक् । प्रकृत्य । अनञ् किम् । अकृत्वा । अव्ययपूर्वपदे किम् । परम् कृत्वा ।

आभीक्ष्ण्ये णमुल् च । ३ । ४ । २२ ॥

आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् क्रा च । नित्यवीप्सयोः । ८ । १ । ४ ॥

आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये पदस्य द्वित्वं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च स्मारम् स्मारम् । नमति शिवम् स्तुत्वा स्तुत्वा । पावम् पावम् । भोजम् भोजम् । आवम् आवम् ।

अन्यथैवकथमित्थंसु सिद्धाप्रयोगश्चेत् । ३ । ४ । २७ ॥

एषु कृतो णमुल् स्यात् सिद्धोऽप्रयोगो यस्य एवम्भूतश्चेत् कृत् । व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः । अन्यथाकारम् । एवङ्कारम् । कथङ्कारम् । इत्थङ्कार

कारकं ॥

भुङ्क्ते । सिद्धेति किम् । शिरोऽन्यथा कृत्वा भुङ्क्ते ।

॥ इति कृदन्तप्रक्रिया ॥

॥ कारकं ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६ ॥

नियतोपस्थितिकः प्रातिपदिकार्थः । मात्र-शब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्ग-मात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् । प्राति-पदिकार्थमात्रे । उच्चैः । नीचैः । कृष्णः । स्त्रीः । ज्ञानम् । लिङ्गमात्रे । तटः । तटी । तटम् । परि-माणमात्रे । द्रोणो व्रीहिः । वचनं संख्या । एकः । द्वौ । बहवः ।

सम्बोधने च । १ । २ । ४७ ॥

प्रथमा हे राम ॥

कर्तुरीप्सिततमं कर्म । १ । ४ । ४९ ॥

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ॥

कर्मणि द्वितीया । २ । ३ । २ ॥

अर्थते कर्मणि द्वितीया। हरिमर्चति। अलिखिते तु कर्मादौ प्रथमा। हरिः सेव्यते। लक्ष्मीः सेवितः।

अर्कथितञ्च। १। ४। ५१॥

अपादानादिविशेषैरविवक्षितकारकं कर्म संज्ञं स्यात्।

दुह्याचपचदण्डरुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम्।
एषां कर्म युक् स्यादकथितन्तथा स्यान्नीहृकृष्वहाम्॥१॥

गान्दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलानोदनम्पचति। गर्गान् शतन्दण्डयति। व्रजमवगुणाति गाम्। माणवकमन्नं भोजयति। दक्षमवचिनोति फलानि। माणवकमर्थम् ब्रूते। शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिर्मथ्नाति। देवदत्तं शतं सुष्णाति। ग्राममजान्नयति। हरति। कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिमिच्छते वसुधाम्। माणवकमर्थमभिधत्ते। वक्तीत्यादि।

साधकतमं करणम्। १। ४। ४२॥

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।

स्वतन्त्र इति कर्तृसंज्ञा ॥

कर्तृकरणयोस्तृतीया । २ । ३ । १८ ॥

अनभिहिते कर्तरि करणे च तृतीया स्यात् ।

रामेण बाणेन हतो वाली ।

कर्मणा यमभिप्रैति स सम्प्रदानम् ।

१ । ४ । ३२ ॥

दानस्य कर्मणा यमभिप्रैति स सम्प्रदान-

संज्ञः ॥

चतुर्थी सम्प्रदाने । २ । ३ । १३ ॥

विप्राय गां ददाति ।

नमस्स्वस्तिस्वाहास्वधालंवषड्योगा-

च्च । २ । ३ । १६ ॥

एभिर्योगे चतुर्थी । हरये नमः । प्रजाभ्यस्-

स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । अल-

मिति पर्याप्तपर्यवसानम् । तेन दैत्येभ्यो हरिरलम्

प्रभुः समर्थः यक्त इत्यादि ॥

ध्रुवमपाये ऽपादानम् । १ । ४ । २४ ॥

अपायो विश्लेषस्तस्मिन् साध्येयद्ध्रुवं तदवधिभूतं

कारकं तदपादानसंज्ञं स्यात् ॥

अपादाने पञ्चमी । २ । ३ । २८

आलादाचाति । धावतोऽश्वात्पततीत्यादि ॥

षष्ठी शेषे । २ । ३ । ५० ॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी । राज्ञः पुरुषः । कर्मादीनामपि तत्तत्प्रातिपदिकार्थविवक्षायां षष्ठ्येव । सताङ्कतम् । सर्पिषो जानीते । मातुस्स्मरति । एधोदकस्योपस्कुरुते । अजे घञ्चोश्चरणयोः ॥

आधारोऽधिकरणम् । १ । ४ । ४५ ॥

कर्तुकर्मद्वारा तत्क्रियाया आधारः कारकमधिकरणं स्यात् ॥

सप्तम्यधिकरणे च । २ । ३ । ३६ ॥

चकारादूरान्तिकार्थैभ्यः । औपश्लेषिको वैषयिको ऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते । स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन्नात्मास्ति । वनस्य दूरे अन्तिके वा ॥

॥ इति विभक्त्यर्थाः ॥

॥ समासः ॥

॥ समासः षड्विधा ॥

तत्र समासनं समासः । स च विशेषसंज्ञा-
विनिर्मुक्तः केवलसमासः प्रथमः । प्रायेण पूर्वपदार्थ-
प्रधानोऽव्ययीभावो द्वितीयः । प्रायेणोत्तरपदार्थ-
प्रधानस्तत्पुरुषस्तृतीयः । तत्पुरुषभेदः कर्मधारयः ।
कर्मधारयभेदो द्विगुः । प्रायेणान्यपदार्थप्रधानो बहु-
व्रीहिश्चतुर्थः । प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः ।

सदर्थः पदविधिः । २ । १ । १ ॥

पदस्वन्वीयो विधिस्समर्थाश्रितो बोध्यः ॥

प्राक्कडारात्समासः । २ । १ । ३ ॥

कड़ाराः कर्मधारय इत्यतः प्राक् समास इत्यधि-
क्रियते ॥

सह सुपा । २ । १ । ४ ॥

सुप्सुपा सह वा समस्यते । समासत्वात् प्रति-
पदिकत्वेन सुपो लुक् । परार्थाभिधानं वृत्तिः ।
कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः ।
वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स च लौकिकोऽलौ-
किकश्चेति द्विधा । तत्र पूर्वं भूत इति लौकिकः । पूर्वं
अस् भूत सु इति अलौकिकः भूतपूर्वः । भूतपूर्वे चर-

ङिति निर्देशात् पूर्वनिपातः ॥ इवेन सह समासो विभक्त्यालोपश्च । वाग्यौ इव वाग्यौविव ॥

॥ इति केवलसमासः प्रथमः ॥

॥ अव्ययीभावः ॥

अव्ययीभावः । २ । १ । ५ ॥

अधिकारोऽयम् । प्राक् तत्पुरुषात् ॥

अव्ययम् विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु । २ । १ । ६ ॥

विभक्त्यर्थादिषु वर्त्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते । प्रायेणाविग्रहो नित्यसमासः । प्रायेणाखपदविग्रहो वा विभक्तौ । हरि ङि अधि ङि इति स्थिते ॥

अधिरीश्वरे ॥ १ । ४ । ९७ ॥

ईश्वरे वर्त्तमानः सुबन्तः अधिरित्येतेन सह समस्यते । अधिगतो हरिमिति विग्रहे अधि सु हरि ङि इति स्थिते ॥

समासप्रत्यये प्रथमानिर्दिष्टमुपसर्जनं स्यात् ॥

उपसर्जनं पूर्वम् । २ । २ । ३० ॥

समासे उपसर्जनं प्राक् प्रयोज्यम् ॥ इत्येषः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां स्वादुत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात् सुपो लुक् । अधिहरि ॥

अव्ययीभावश्च । २ । ४ । १८ ॥

अयं नपुंसकं स्यात् । गाः पातीति गोपाः । तस्मिन्नित्यधिगोपम् ॥

नाव्ययीभावादतोऽम् त्वपञ्चम्याः । २ । ४ । ८३ ॥

अदन्तादव्ययीभावात् सुपो न लुक् तस्य पञ्चमीं विना अमादेशः ॥

तृतीयासप्तम्योर्बहुलम् । २ । ४ । ८४ ॥

अदन्ताद्व्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः । उपकृष्णम् । उपकृष्णेन । मद्राणां समृद्धिः सुमद्रम् । यवनानां दृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रां संप्रति न शुभ्यत इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश्य द्योतिहरि । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सा-

यद्दार्थालतिष्टन्तिसाहस्राणि यथार्थाः । रूपस्य योग्य-
लघुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । प्रतिजनतिकल्प
घ्यायन्ति ।

अव्ययीभावे चाकाले । ६ । २ । ८१ ॥

सप्तम्या सः स्यादव्ययीभावे गतु काले । हरेः
साद्दश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण
युगपत्चक्रम् । सदृशः सख्या ससखि । चक्राणां
संपत्तिः सचक्रम् । तृणमप्यपरित्यज्य सतृणम्
अग्नि । आनिग्रन्थ्यपर्यन्तसवीते साग्नि ॥

नदीभिश्च । २ । १ । २० ॥

नदीभिः सह सख्या वा ससख्यते । समाचारे
चायमिष्यते । यवप्रगम् । द्वियमुनयम् ॥

तद्धिताः । ४ । १ । ७६ ॥

आपत्यमपत्यादेरधिकारोऽयम् ।

अव्ययीभावे शरत्प्रभृतिभ्यः ।५।४।१०७ ॥

शरदादिभ्यश्च स्यात् समासान्तोऽव्ययीभावे ।
शरदः समीपमुपशरदम् । प्रतिविषाग्नम् । जराया
जरस् च । उपजरसमित्यादि ।

अनश्च । ५ । ४ । १०८ ॥

अन्नन्तादव्ययीभावाट्टच् ।

नस्तद्धिते । ६ । ४ । १४४ ॥

नान्तस्य अस्य टेर्लोपस्तद्धिते । उपराजन् ।
अध्यात्मम् ।

नपुंसकादन्यतरस्याम् । ५ । ४ । १०८ ॥

अन्नन्तं यत् क्लीवं तदन्तादव्ययीभावाट्टच् वा
उपचर्मम् । उपचर्म ।

अयः । ५ । ४ । १११ ॥

अयन्तादव्ययीभावाट्टच्वा । उपसमिधम् ।
उपसमित् ।

॥ इत्यव्ययीभावः ॥

तत्पुरुषः ।

तत्पुरुषः । २ । १ । २२ ॥

अधिकारोऽयम् प्राग्बहुव्रीहेः ।

द्विगुश्च । २ । १ । २३ ॥

तत्पुरुषसंज्ञकः ।

द्वितीयाश्रितातीतपतितगतात्यस्तप्रा-
प्तापन्नैः । २ । १ । २४ ॥

द्वितीयान्तं श्रितादिप्रकृतिकैः । सुवन्तैः सह वा समस्यते । कृष्णं श्रितः कृष्णाश्रितः इत्यादि ।

तृतीया तत्कृतार्थेन गुणवचनेन । २ । १ ॥

तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत् । शङ्कुलया खण्डः । शङ्कुला-खण्डः । धान्येनार्थो धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः ।

कर्त्तृकरणे कृता बहुलम् । २ । १ । ३२ ॥

कर्त्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । हरित्रातः । नखभिन्नः । कृद्ग्रहणे नतिकारकपूर्वस्यापि ग्रहणम् । नखनिर्भिन्नः ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः

२ । १ । ३३ ॥

चतुर्थ्यन्तार्थाय यत् तदाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । यूपाय दारु । यूपदारु । तदर्थेन प्रकृतिविकृतिभाव एवेष्टः । तेनेह न । स्थूणाय स्थाली ॥

अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति

वक्तव्यम् । द्विजाय । ऋषभम् । द्विजार्थसूपः । द्विजार्थो यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ।

पञ्चमी भयेन । २ । १ । ३७ ॥

चोराद्भयम् । चोरभयम् ।

स्तोकान्तिक कदर्थकृच्छ्राणितेन । २ । १ । ३८ ॥

पञ्चम्याः स्तोकादिभ्यः । ६ । ३ । २ ॥

अलुगुत्तरपदे । स्तोकान्मुक्तः । अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । कृच्छ्रादागतः ।

षष्ठी । २ । ३ । ८ ॥

सुबन्तेन प्राग्वत् । राजपुरुषः ।

पूर्वापरप्रधमोत्तमैकदेशिसंख्यैकाधिकरणे । २ । २ । १ ॥

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी । षष्ठी समासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । एकाधिकरणे किम् । पूर्वैः क्षत्रियाणाम् ।

अर्धं नपुंसकम्। २। २। २॥

समांशवाच्यर्धशब्दो नित्यं क्लीवे सं प्राग्वत्।

अर्धं पिप्पल्या अर्धपिप्पली।

सप्तमीशौण्डैः। २। १। ४०॥

सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्डः। इत्यादि। द्वितीयाद्यतीयेत्यादि योगविभागादन्यत्रापि द्वितीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः।

दिक् संख्ये संज्ञायाम्। १। १। ४०॥

संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेषु कामशमी पूर्वकामशमी। सप्त ऋषयः। सप्तर्षयः। तेनेह न। उत्तरा ऋचाः। पञ्चब्राह्मणाः।

तद्धितार्थोत्तरपदसमाहारे च।२।१।५१॥

तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः पूर्वशालो इति समासे जाते। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः।

दिक् पूर्वपदादसंज्ञायां जः।४।२।१०७॥

अस्मादृभवाद्यर्थे जः स्यादसंज्ञायाम्।

तद्धितेष्वचामादेः। ७। २। ११७॥

ञिति णिति च तद्धितेष्वचामादेरचोऽन्त्यादि:
ात्। यस्येति च। पौवँशाल:। पञ्चगावो धनं
स्येति तिपदे वञ्चबीहौ।

द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमास-
चनम् ॥ गोरतद्धितलुकि। ५। ४। ९२ ॥

गौन्तात्तत्पुरुषाट्टच् स्यात् समासान्तौ नतु
द्धितलुकि। पञ्चगवधनः।

तत्पुरुषः समानाधिकरणः कर्मधारयः।
। २। ४२ ॥

संख्यापूर्वो द्विगुः। २। १। ५२ ॥

तद्धितार्थैत्यत्रोक्तस्विविधः संख्यापूर्वो द्विगुसंज्ञः
ात्।

द्विगुरेकवचनम्। २। ४। १ ॥

द्विग्वर्थः समाहार एकवत् स्यात्।

स नपुंसकम्। २। ४। १७ ॥

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। पञ्चानां
वां समाहारः पञ्चगवम्।

वर्णोऽवर्णं विशेषेण वञ्चलम् ।२।१।५७ ॥

भेदकं भेद्येन समानाधिकरणेन वञ्चलं

प्राग्वत् । नीलमुत्पलं नीलोत्पलम् । वज्रलग्नहणात् क्वचिन्नित्यम् । कृष्णसर्पः । क्वचिन्न रासो जाम्बद्ग्रः ।

उपमानानि सामान्यवचनैः ।२।१।५५॥

घनश्यामः ।

घाकपार्थिवादीनामुत्तरपदलोपो वक्तव्यः । घाक-प्रियः पार्थिवः । घाकपार्थिवः । देवब्राह्मणः ।

नञ् । २ । २ । ६ ॥

नञ् सुपा प्राग्वत् ।

न लोपो नञः । ६ । ३ । ७३ ॥

नञो नस्य लोप उत्तरपदे यमब्राह्मणः ।

तस्मान्नुड्चि । ६ । ३ । ७४ ॥

नुमनकारान्नञ् उत्तरपदस्यादेर्नुट् अनश्वः । नैकश्येत्यादौ तु नञ्शब्देन सह सुप्सुपेति समासः ।

क्त्यादयः । २ । २ । १८ ॥

एते समर्थेन नित्यं समस्यन्ते । कुत्सितः पुरुषः । कुपुरुषः ।

ज्योतिर्जनपदरात्रि । १ । ४ । ६१ ॥

ऊर्यादयः च्व्यन्ता डाज्लान्ताश्च क्रियायोगे गतिसंज्ञाः स्युः । ऊरीकृत्य । शुक्लीकृत्य । पटपटाकृत्य । सुपुरुषः ।

प्रादयो गताद्यर्थे प्रथमया ॥ प्रगत आचार्यः । प्राचार्यः ॥

अत्यादयः क्रांताद्यर्थे द्वितीयया । अतिक्रांतो मालामिति विग्रहे ॥

एकविभक्तिचापूर्वनिपाते । १ । २ । ४४ ॥

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं नतु तस्य पूर्वनिपातः ।

गोस्त्रियोरुपसर्जनस्य । १ । २ । ४८ ॥

उपसर्जनं यो गो शब्दः स्त्रीप्रत्ययान्तश्च तदन्तस्य प्रातिपदिकस्य ह्रस्वः । अंतिमालः ।

अवादयः क्रुष्टाद्यर्थे तृतीयया । अवक्रुष्टः कोकिलया अवकोकिलः ॥

परिदयो ग्लानाद्यर्थे चतुर्थ्या । परिग्लानोऽध्ययनाय पर्यध्ययनः ।

निरादयः क्रान्ताद्यर्थे पञ्चम्या । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः ।

तत्रोपपदं सप्तमीस्थम् । ३ । १ । ९२ ॥

लक्ष्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि तद्वाचकं सदनुपपदं स्यात् ।

उपपदमतिङः । २ । २ । १९ ॥

उपपदं समर्थेन नित्यं समस्यते ऽतिङन्तं च समासः । कुम्भं करोतीति कुम्भकारः । अतिङ् किम् । सा भवान् भूत् । माङि लुङीति सप्तमी निर्देशात् माङुपपदस्य । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । व्याघ्री । चर्मकारी । कच्छपीत्यादि ॥

तत्पुरुषस्याङ्गुलेःसंख्याव्ययादेः । ५ । ४ । ८९ ॥

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । निर्गतमङ्गुलिभ्यो निरङ्गुलम् ॥

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः । ५ । ४ । ८७ ॥

एभ्यो रात्रेरच् स्यात् चात्संख्याव्ययादेः । अहश्च रात्रिश्च अहर्निशं द्वन्द्वार्थम् ॥

रात्राह्नाहाः पुंसि । २ । ४ । २९ ॥

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अहश्च रात्रिश्चाहोरात्रः । सर्वरात्रः । संख्यातरात्रः ॥ संख्यापूर्वं रात्रं क्लीवम् । द्विरात्रम् त्रिरात्रम् ॥

राजाहः सखिभ्यष्टच् । ५ । ४ । ९१ ॥

एतदन्तात्तत्पुरुषाट्टच् परमराजः ॥

आन्महतस्समानाधिकरणजातीययोः । ७ । ३ । ४७ ॥

महाराजः प्रकारवचने जातीयर् । महाकारो महाजातीयः ॥

द्वयष्टनः संख्यायामबहुव्रीह्यशीत्योः । ६ । ३ । ४७ ॥

अत् स्यात् । द्वादश । अष्टाविंशतिः ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः । २ । ४ । २५ ॥

कुक्कुटमयूर्यौ विशे । मयूरीकुक्कुटौ । अर्द्धपिप्पली ॥

द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु न । पञ्च कपालः पुरोडाशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलंकुमार्यै अलं-

नारिः । अत एव ज्ञापकात् समासः । निष्कौ-
घाम्बिः ॥

अर्द्धर्चाः पुंसि च । २ । ४ । ३१ ॥

अर्द्धर्चादयः पुंसि क्लीवे च स्युः । अर्द्धर्चः । अर्द्धर्चम् । एवं व्रजतीर्थशरीरमण्डपयूषदेहाङ्कुश-कलशपात्रच्छत्रादयः ।

सामान्ये नपुंसकम् । स्वदु पचति । मातः कम-नीयम् ।

॥ इति तत्पुरुषः ॥

॥ बहुव्रीहिः ॥

शेषो बहुव्रीहिः । २ । २ । २३ ॥

अधिकारोऽयम् । प्राग्बन्धात् ।

अनेकमन्यपदार्थे । २ । २ । २४ ॥

अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः ॥

सप्तमी विशेषणे बहुव्रीहौ । २ । २ । ३५ ॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ एवं स्यात् ।

कण्ठेकालः । अतएव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः ।

हलन्तात्सप्तम्याः संज्ञायाम् ।६।३।९ ॥

हलन्ताददन्ताच्च सप्तम्या अलुक् । त्वचिसारः । प्राप्तमुदकं यं प्राप्तोदको ग्रामः । जढरघोऽनड्वान् । उपहृतपथ्यरुद्रः । उद्धतौदना स्थाली । पीतास्वरो-हरिः । वीरपुरुषको ग्रामः ।

प्रादिभ्यो धातुजस्य वाच्यो वाचोत्तरपदलोपश्च । प्रपतितपर्णः प्रपर्णः ।

नञोऽस्त्यर्थानां वाच्यो वाचोत्तरपदलोपः । अविद्यमानपुत्रोऽपुत्रः ।

स्त्रियाः पुम्वद्भाषितपुंस्कादनूङ्समा-नाधिकरणे स्त्रियामपूरणीप्रियादिषु । ९ । ३ । ३४ ॥

उक्तपुंस्कानन्ङ् ऊङोऽभावो यत्र तयाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं समानाधिकरणे तु पूरण्यां प्रियादौ च । गोस्त्रियोरिति ह्रस्वः । चित्रगुः । रूपवद्भार्य्यः । अनूङ् किल । वामोरुभार्य्यः ।

अप् पूरणीप्रमाण्योः । ५।४।११६ ॥

पूरणार्थप्रत्ययान्तं यत् स्त्रीलिङ्गं तदन्तात् प्रमाणवन्तात्च बहुव्रीहेरप् स्यात् । कल्याणी-पञ्चमी यासां रात्रीणां ताः कल्याणी पञ्चमा रात्रयः । स्त्रीप्रमाणी यस्य स्त्रीप्रमाणः । अग्रिया-दिषु किम् । कल्याणीभ्रियः इत्यादि ।

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।५।

। ४ । ११३ ॥

स्वाङ्गवाचि सक्थ्यक्ष्यन्ताबहुव्रीहेः षच् । दीर्घ-सक्थः । जलजाक्षी । स्वाङ्गात् किम् । दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः । अक्ष्णोऽदर्शनादिति वक्तव्यमत्रोच् ।

ङिच्चिह्यां नञ्सूर्भ्यः । ५ । ४ । ११५ ॥

ङिच्चिह्यां परस्य नञ्सूर्भ्यः । असूर्भ्यः । निसूर्भ्यः ।

अन्तर्बहिर्भ्यश्च लोम्नः ।५। ४ । ११७ ॥

अप् स्यात् । अन्तर्लोमः । बहिर्लोमः ।

सादृश्ये लोपोऽवयवादिभ्यः ।५।४।१३८॥

हस्त्यादिवर्जितादुपमानात् परस्य सादृश्य लोपः ।

व्याघ्रस्येव पादावस्य व्याघ्रपात् । चर्षादिभ्यः
किल् । चर्षिपादः । कुक्कुलपादः ।

संख्यासुपूर्वस्य । ५ । ४ । १४० ॥

लोपः स्यात् ॥ द्विपात् । सुपात् ।

उद्विभ्यां काकुदस्य । ५ । ४ । १४८ ॥

लोपः स्यात् । उत्काकुत् । विकाकुत् ।

पूर्णाद्विभाषा । ५ । ४ । १४९ ॥

पूर्णकाकुत् । पूर्णकाकुदः ।

सुहृद्दुर्हृदौ मित्रामित्रयोः । ५ । ४ । १५० ॥

सुहृन्मित्रम् । दुर्हृदमित्रः ।

उरः प्रभृतिभ्यः कप् । ५ । ४ । १५१ ॥

कस्कादिषु च । ८ । ३ । ४८ ॥

एभ्यश्च उत्तरस्य विसर्गस्य षोऽन्यस्य तु स इति
सः व्यूढोरस्कः । प्रियसर्पिष्कः ।

निष्ठा । २ । ३ । ३६ ॥

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । युक्तयोः

शेषाद्विभाषा । ५ । ४ । १५४ ॥

असमासाल्लाद्बहुव्रीहेः कप् वा । अंश-
यष्कः । अंशयष्टः ।

॥ इति बहुव्रीहिः ॥

॥ द्वन्द्वः ॥

चार्थे द्वन्द्वः । २ । २ । २९ ॥

अनेकं सुबन्तं चार्थे वर्त्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहारा-श्चार्थाः । तत्रेश्वरं गुरुञ्च भजस्वेति परस्परनिरपेक्ष-स्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । भिक्षामट गां चान-येति । अन्यतरस्यानुषङ्गिकत्वे नान्वयोऽन्वाचयः । अनयोरसामर्थ्यात् समासो न । धवखदिरौ छिन्धीति । मिलितानामन्वय इतरेतरयोगः । संज्ञापरिभाषमिति समूहः समाहारः ।

राजदन्तादिषु परम् । २ । २ । ३१ ॥

एष पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजा राजदन्तः ।

वर्ष्मादिष्वनियमः । अर्थधर्मौ । धर्मार्थौवि-त्यादि ।

पूर्वं द्वन्द्वैकदेशे । २ । २ । ३२ ॥

पूर्वं स्यात् । हरिहरौ ।

अजाद्यदन्तम् । २ । २ । ३३ ॥

ईशकृष्णौ ।

अल्पाच्तरम् । २ । २ । ३४ ॥

शिवकेशवौ ।

पिता मात्रा । १ । २ । ७० ॥

मात्रा सहोक्तौ पिता वा शिष्यते ॥ पितरौ मातापितरौ ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २।४।२ ॥

एषां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिक-पाणविकम् । रथिकाश्वारोहम् ।

द्वन्द्वाच्चुदषहान्तात्समाहारे ।५।४।१०६॥

चवर्गान्ताट्टषहान्ताच्च द्वन्द्वाट्टच् स्यात् समाहारे । वाक्त्वचम् । त्वक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारे किम् । प्रावृट्शरदौ ।

॥ इति द्वन्द्वः ॥

—:०:—

॥ समासाः ॥

ऋक्पूरब्धूः पथामानक्षे ।५।४।७४ ॥

ऋनाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः । अक्षेया घूस्तदन्तस्य न ॥ अङ्गैः । विष्णुपुरम् । विसलापं सरः । राजधुरा । अक्षेतु । अक्षधूः ॥

दृढपूरजः । सन्विषयः । रक्ष्यमयो देशः ॥

अदसोऽदूर्पुनात् । ५ । ४ । ७६ ॥

अचचुः परोक्षायाश्च स्यात् । गवाक्षश्चौव गवाचः ॥

उपसर्गादृच्छनः । ५ । ४ । ८५ ॥

अगतोऽध्वानं प्राध्वोरथः ॥

न पूजनात् । ५ । ४ । ९६ ॥

पूजनार्थात् परेभ्यः समासान्ता न स्युः । सु-राजा । अतिराजा ॥

॥ इति समासान्ताः ॥

—:०:—

॥ तद्धिताः ॥

समर्थानां प्रथमाद्वा ।४।१।८२॥

इदमधिक्रियते । प्राग्दिश इति यावत् ।

अश्वपत्यादिभ्यश्च । ४ । १ । ८४ ॥

एभ्योऽण् स्यात् प्राग्दीव्यतोयेष्वर्थेषु ॥

तद्धितेष्वचामादेः । ७ । २ । ११७ ॥

जिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः

स्यात् । अश्वपतेरपत्यादि । आश्वपतम् । गाण-पतम् ॥

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।४। १। ८५ ॥

प्राग्दीव्यतोयेष्वर्थेषु । दितेरपत्यं दैत्यः ॥ अदिते-रादित्यस्य वा आदित्यः । प्राजापत्यः । देवाद्य-ञोः । दैव्यम् । दैवम् ।

वह्निष्टिलोपोवञ्च । वाह्यः । ईकारकक्च ॥

क्षिति च । ७ । २ । ११८ ॥

अचामादेरचो दृद्धिः स्यात् । वाह्नीकः ॥

गोरजादिप्रसङ्गे यत् । गोरपत्यादि । गव्यम् ।

उत्सादिभ्योऽञ् । ४ । १ । ८६ ॥

औत्सः । इत्यपत्यादि विकारान्तार्थाः प्रत्ययाः ॥

स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात् ।४।

१ । ८७ ॥

धान्यानां भवन इत्यतः प्राग्यैष्वाख्यानेतौ स्तः । स्त्रैणः । पौंस्नः ।

तस्यापत्यम् । ४ । १ । ९२ ॥

शिवादिभ्योऽण् । ४ । १ । ११२ ॥

अपत्ये । शैवः । गार्गः ।

ऋष्यन्धकवृष्णिकुरुभ्यश्च । ४ । १ । ११४ ॥

ऋषिभ्यः ॥ वाशिष्ठः । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । वृष्णिभ्यः । वासुदेवः । कुरुभ्यः । नाकुलः । साहदेवः ॥

मातुरुत्संख्यासंभद्रपूर्वायाः । ४ । १ । ११५ ॥

संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण् प्रत्ययश्च । द्वैमातुरः । पाण्मातुरः । सान्मातुरः । भाद्रमातुरः ।

स्त्रीभ्यो ढक् । ४ । १ । १२० ॥

स्त्रीप्रत्ययान्तेभ्यो ढक् । वैनतेयः ।

कद्र्याः कनीन च । ४ । १ । ११६ ॥

चादण् । कानीनो व्यासः कर्णश्च ।

राजश्वसुराद्यत् । ४ । १ । १३७ ॥

राज्ञो जातावेव ॥

ये चाभावकर्मणोः । ६ । ४ । १६८ ॥

यादौ तद्धितेऽन् प्रकृत्या स्याच्चेत् भावकर्मणोः । राजन्यः । जातावेवेति किम् ।

अत । ६ । ४ । १६७ ॥

अन् प्रकृत्यादि परे । राजनः । क्षत्रियः ॥

क्षत्राद् घः । ४ । १ । १३८ ॥

क्षत्रियः । जातावित्येव । क्षात्रियन्यः ।

रेवत्यादिभ्यष्ठक् । ४ । १ । १४६ ॥

ठस्येकः । ७ । ३ । ५० ॥

अङ्गात् परस्य ठस्येकादेशः । रैवतिकः ।

जनपदशब्दात् क्षत्रियादञ् । ४ । १ । १६८ ॥

जनपदक्षत्रियवाचकात्क्षुद्राद्ञपत्ये । पाञ्चालः ।

क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्य-

वत् । पञ्चालानां राजा पाञ्चालः ॥

पुरोरण् । पौरवः ।

पाण्डोर्ढञ् । पांड्यः ।

कुरुनादिभ्यो ण्यः । ४ । १ । १७२ ॥

कौरव्यः । नैषध्यः ।

ते तद्राजाः । ४ । १ । १७४ ॥

अजादयस्तदाज-संज्ञाः स्युः ।

तद्राजस्य बहुषु तेनैवास्त्रियाम् । २ ।

। ४ । ६२ ॥

वञ्चुप्रंसोर्यु तद्राजस्य लुक् तत्कृते वञ्चत्वे नतु क्लियाद् । प्रञ्चालाः इत्यादि ।

काम्बोजाल्लुक् । ४ । १ । १७५ ॥

अस्मात्तद्राजस्य लुक् । काम्बोजः । काम्बोजौ ।

काम्बोजादिभ्य इति वक्तव्यम् । चोलः । द्रमकाः ।

केरलः । यवनः ।

॥ इत्यपत्याधिकारः ॥

तेन रक्तं रागात् । ४ । २ । १ ॥

अण स्यात् । कषायेण रक्तं वस्त्रं काषायम् ।

नक्षत्रेण युक्तः कालः । ४ । २ । ३ ॥

अण स्यात् ।

तिष्यपुष्ययोर्नक्षत्रादणि यलोप इति वाच्यम् ।

पुष्येण युक्तं पौषमहः ॥

लुबविशेषे । ४ । २ । ४ ॥

पूर्वेण विहितस्य लुप् षष्ठिदण्डात्मकस्य कालस्यावान्तरविशेषत्वेन गम्यते । अद्य पुष्यः ॥

दृष्टं साम । ४ । २ । ७ ॥

तेनेत्येव । वशिष्ठेन दृष्टं वाशिष्ठं साम ।

वामदेवाड्-ड्यड्ड्यौ । ४ । २ । ९ ॥

वामदेवेन दृष्टं साम वामदेव्यम् ॥

प्रतिवृतोरथः । ४ । २ । १० ॥

अस्मिन्नर्थेऽण् प्रत्ययो भवति । वल्गेण परिवृतौ वाल्गोरथः ।

तदोद्धृतसमवेभ्यः । ४ । २ । १४ ॥

शरावे उद्धृतः शरावः । ओदनः ॥

संस्कृतं भक्षाः । ४ । २ । १६ ॥

सप्तम्यन्तादण् स्यात् संस्कृतेऽर्थे तत् संस्कृतं भक्षाश्चेत् ते स्युः । व्राह्मेषु संस्कृता व्राष्टा भक्षाः ॥

साऽस्य देवता । ४ । २ । २४ ॥

इन्द्रो देवता अस्येति ऐन्द्रं हविः । पाशुपतम् । ब्राह्मस्त्यम् ।

धुक्राड्ड घन् । ४ । २ । २६ ॥

धुक्रिघस् ॥

सोमाट् ष्यण् । ४ । २ । ३० ॥

सौम्यम् ।

वाय्वृतुपितुषसोयत् । ४ । २ । ३१ ॥

वाय्यम् । ऋतव्यम् ।

रीङ् ऋतः । ७ । ४ । २७ ॥

अङ्गावयवे असार्वधातुके यकारे च्वौ चपरे ऋतो रीङादेशः । यस्येति च । पित्रयम् । उपरस्यम् ॥

पितृव्यमातुलमातामहपितामहाः । ४ । २ । ३५ ॥

एते निपात्यन्ते । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । मातुः पिता मातामहः । पितुः पिता पितामहः ॥

तस्य समूहः । ४ । २ । ३७ ॥

काकानां समूहः काकम् ।

भिक्षादिभ्योऽण् । ४ । २ । ३८ ॥

भैक्षम् । गर्भिणीनां समूहो गार्भिणम् । इह अस्याढ़े तञ्चित इति पुब्भावे कृते ।

इनण्यनपत्ये । ६ । ४ । १६४ ॥

यनपत्यार्थेऽणि इन् प्रकृत्या । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवतम् ॥

आमनडनन्युमनुष्यतत् । ४ । २ । ४३ ॥

तदन्तं स्त्रियां । आमता । जनता । तानन्यु ।

गजसहायस्यां चेति वक्तव्यम् । गजता । सहायता ॥

अन्यः खः क्रतौ । अहीनः ।

अचित्तहस्तिधेनोष्ठक् । ४ । २ । ४७ ॥

इक्षुशुक्रान्तात् कः । ७ । ३ । ५१ ॥

इक्षु शुक्र उक्ष तान्तात् परस्य ठस्य कः । साक्षुकम् । हास्तिकम् । धैनुकम् ।

तदधीते तद्वेद । ४ । २ । ५९ ॥

न यांभ्यां पदान्ताभ्यां पूर्वौतु ताभ्यामैच् । ७ । ३ । ३ ॥

पदान्ताभ्यां यकारवकाराभ्यां परस्य नः वृद्धिः किन्तु ताभ्यां पूर्वौ क्रमादेतौ आगमौ स्तः । व्याकरणमधीते वेद वा वैयाकरणः ॥

क्रमादिभ्यो वुन् । ४ । २ । ६१ ॥

क्रमकः । पदकः । शिक्षकः । मीमांसकः ॥

तदस्मिन्नस्तीतिदेशे तन्नाम्नि । ४ । २ । ६७ ॥

उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरो देशः ॥

तेन निर्वृत्तम् । ४ । २ । ६८ ॥

कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी ।

तस्य निवासः । ४ । २ । ६९ ॥

शिबीनां निवासो देशः शैवः ॥

अदूरभवश्च । ४ । २ । ७० ॥

विदिशाया अदूरभवं वैदिशम् ॥

जनपदे लुप् । १ । २ । ५१ ॥

जनपदे वाच्ये चातुरर्थिकस्य लुप् ।

लुपि युक्तवद्व्यक्तिवचने । १ । २ । ५१ ॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥

वरणादिभ्यश्च । ४ । २ । ८२ ॥

अजनपदार्थं आरम्भः । वरणानामदूरभवं नगरं वरणाः ।

कुलुदनडवेतसेभ्यो डमतुप् । ४ । २ । ८७ ॥

अयः । ८ । २ । १० ॥

अवन्तान्मतोर्मस्य वः । कुलुत्थान् । नड्वान् ।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।

८ । २ । ९ ॥

अवर्णवर्णान्तात्स्वर्णवर्णोपधाच्च यवादि वर्जितात् घरस्य अतोर्मस्य वः । वेतस्वान् ।

नड़शादाड् ड्वलच् । ४ । २ । ८८ ॥

नड्वलः ।

शिखाया वलच् । ४ । २ । ८९ ॥

शिखावलः ।

॥ इति चातुरर्थिकाः ॥

शेषे । ४ । २ । ९२ ॥

अपत्यादिचतुर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषवः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । चतुर्भिर्युक्तं चातुरं । शकटम् । चतुर्दृश्यां दृश्यते चातुर्दृशं रक्षः । तस्य विकार इत्यतः प्राक् शेषाधिकारः ।

राष्ट्रावारपाराद् घखौ । ४ । २ । ९३ ॥

राष्ट्रे जातादि राष्ट्रियः । अवारपारीणः ।

अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् । अवारीणः । पारीणः । पारावारीणः ।

इह प्रकृतिविशेषात् प्यादय घुयलन्ता उच्यन्ते तेषां त्रातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ।

ग्रामाद्यखञौ । ४ । २ । ९४ ॥

ग्राम्यः । ग्रामीणः ।

नद्यादिभ्यो ढक् । ४ । २ । ९५ ॥

नादेयम् । साहेयम् । वाराणसेयम् ।

दक्षिणापश्चात्पुरसस्त्रक् । ४ । २ । ९८ ॥

दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ।

दुप्राग्पागुदक्प्रतीची यत् । ४ । २ । १०१ ॥

दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ।

अव्ययात्त्रप् । ४ । २ । १०४ ॥

असेरल्लुक्तस्तित्रेभ्य एव । अमात्यः । इदात्यः । कात्यः । ततस्त्यः । तत्यः ।

त्यवत्तेर्भुवे । नित्यः ।

दृद्भ्रियस्याचामादिस्तद्वद्भम् । १ । १ । ७३ ॥

यस्य समुदायस्याचां मध्य आदिर्दृद्भ्रिवद्दृद्भसंज्ञं स्यात् ।

त्यदादीनि च ॥ १ ॥ १ ॥ ७४ ॥

टङ्संज्ञानि स्युः ।

टङ्ङाञ्छः ॥ ४ ॥ २ ॥ ११४ ॥

घालीयः । तदीयः ।

वा नामधेयस्य । टङ्संज्ञा । दैवदत्तीयः । दैवदत्तः ।

गहादिभ्यश्च ॥ ४ ॥ २ ॥ १३८ ॥

गह्यः ।

युष्मदस्मदोरन्यतरस्यां खञ्च ।४।३।१ ॥

चाच्छः । पक्षेऽण । युवयोर्युष्माकं वायं युष्मदीयः । अस्मदीयः ।

तस्मिन्नणि च युष्माकास्माकौ ।४।३।२ ॥

युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ।

तवकममकावेकवचने ।४।३।३ ॥

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः । तावकः । आमकीनः । आमकः । छेदु ।

प्रत्ययोत्तरपदयोश्च । ७ । २ । ९८ ॥

सप्तम्यन्तयोरनयोरेकार्थवाचिनोरवयवी स्वः प्रत्यये उत्तरपदे च परतः । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः ।

मध्यान्मः । ४ । ३ । ८ ॥

मध्यमः ।

कालाट्ठञ् । ४ । ३ । ११ ॥

कालिकम् । मासिकम् । सांवत्सरिकम् । अव्ययानां समासे टिलोपः । सायंप्रातिकः । पौनःपुनिकः ।

प्रावृषः एण्यः ॥ ४ ॥ ३ ॥ १७ ॥

प्रावृषेण्यः ।

सायंचिरंप्राह्णेप्रगेव्ययेभ्यष्ठ्युट्युलौतुट् च । ४ ॥ ३ ॥ २३ ॥

सायमित्यादिभ्यश्चतुर्थ्यन्तेभ्यश्च कालवाचिभ्यः ष्ठ्युट्युलौ स्तयोस्तुट च । सायन्तनम् । चिरन्तनम् । प्राह्णे प्रगेऽनयोरिदन्तत्वं निपात्यते प्राक्तनम् । प्रगेतनम् । दोषातनम् ।

तत्र जातः । ४ । ३ । २५ ॥

सप्तमी समर्थाज्जात इत्यर्थेऽणादयो ऽयाद-
यश्च स्युः । खुघ्ने जातः । खौघ्नः । उत्से जातः ।
औत्सः । राष्ट्रे जातः । राष्ट्रियः । अवारपारे
जातः । अवारपारीणः । इत्यादि ॥

प्रावृषष्ठप् । ४ । ३ । २६ ॥

एण्यापवादः । प्रावृषिकः ।

प्राग्य स्रावः । ४ । ३ । ३९ ॥

ततस्त्वेव । खुघ्ने प्रायेण बाहुल्येन भवति ।
खौघ्नः ।

सम्भूते । ४ । ३ । ४१ ॥

खुघ्ने सम्भवति । खौघ्नः ।

कौशाड्ढञ् । ४ । ३ । ४२ ॥

कौशेयं वस्त्रम् ।

तत्र भवः । ४ । ३ । ५३ ॥

खौघ्नः । औत्सः । राष्ट्रियः ।

दिगादिभ्यो यत् । ४ । ३ । ५४ ॥

दिग्यन् । वर्ग्यम् ।

शरीरावयवाच्च । ४ । ३ । ५५ ॥

दन्त्यम् । कण्ठ्यम् । अध्यात्मादेष्ठञिष्यते । अध्यात्मे भवमाध्यात्मिकम् ।

अनुशतिकादीनाञ्च । ७ । ३ । २० ॥

एषामुभयपदवृद्धिर्जिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । आहतिगणोऽयम् ।

जिह्वामूलाङ्गुलेश्छः । ४ । ३ । ६२ ॥

जिह्वामूलीयम् । अङ्गुलीयम् ।

वर्णाच्च । ४ । ३ । ६३ ॥

कवर्गीयम् ।

तत आगतः । ४ । ३ । ७४ ॥

स्रुघ्नादागतः । सौघ्नः ।

ठगायस्थानेभ्यः । ४ । ३ । ७५ ॥

शुल्कशालाया आगतः । शौल्कशालिकः ।

विद्यायोनिसम्बन्धेभ्यो वुञ् ।४।३।७७॥

औपाध्यायकः । पैतामहकः ।

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।४।३।८१॥

समादागतं ससरूप्यम् । पचे गहादित्वाच्छः ।
सलीपम् । देवदत्तरूप्यम् । दैवदत्तम् ।

अयठ् च । ४ । ३ । ८२ ॥

समसयम् । देवदत्तसयम् ॥

प्रभवति । ४ । ३ । ८३ ॥

हिमवतः प्रभवति हैमवती गङ्गा ।

तद्गच्छति पथिदूतयोः । ४ । ३ । ८५ ॥

स्रुघ्नसङ्गच्छति स्रौघ्नः । पन्था दूतो वा ।

अभिनिष्क्रामति द्वारम् । ४ । ३ । ९८ ॥

स्रुघ्नमभिगच्छति स्रौघ्नं । कान्यकुब्जद्वारम् ।

अधिकृत्य कृते ग्रन्थे । ४ । ३ । ८७ ॥

शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ॥

सोऽस्य निवासः । ४ । ३ । ८९ ॥

स्रुघ्नो निवासोऽस्य स्रौघ्नः ॥

तेन प्रोक्तम् । ४ । ३ । १०१ ॥

पाणिनिना प्रोक्तं पाणिनीयम् ।

तस्येदम् । ४ । ३ । १२० ॥

उपगोरिदं औपगवम् ।

॥ इति यौधिकाः ॥

तस्य विकारः । ४ । ३ । १३४ ।

अश्मनो विकारे टिलोपः । अश्मनो विकारः ।

आश्मः । आश्मनः । मार्त्तिकः ।

अवयवे च प्राण्योषधिवृक्षेभ्यः ।४।३।१३५॥

चाविकारे । मयूरस्यावयवो विकारो वा मायूरः ।

सौर्वम् । काण्डम् । अस्म वा । पैप्पलम् ।

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ।

४ । ३ । १४३ ॥

प्रकृतिमात्रान्मयड्वा स्यात् विकारावयवौ यः

अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम् ।

सौम्नः । स्रुपः । कार्पासमाच्छादनम् ।

नित्यं वृद्धशरादिभ्यः । ४ । ३ । १४४ ॥

आग्नेयम् ।

गोश्च पुरीषे । ४ । ३ । १४५ ॥

गोमयम् ।

गोपयसोर्यत् । ४ । ३ । २४५ ॥

गव्यम् । पयस्यम् । इति प्राग्दीव्यतीयाः ।

प्राग्वहतेष्ठक् । ४ । ४ । १ ॥

तद्वहतीत्यतः प्राक् ठगधिक्रियते ।

तेन दीव्यति खनति जयति जितम् ।

४ । ४ । २ ॥

अक्षैर्दीव्यति खनति जयति जितं वा ।

आक्षिकम् ।

संस्कृतम् । ४ । ४ । ३ ॥

दध्ना संस्कृतं दाधिकम् । सारिंचिकम् ।

तरति । ४ । ४ । ५ ॥

उडुपेन तरति । औडुपिकः ।

चरति । ४ । ४ । ८ ॥

हस्तिना चरति हास्तिकः । दध्ना चरति दाधिकः ।

संसृष्टे । ४ । ४ । २२ ॥

दध्ना संसृष्टं दाधिकम् ।

उज्जयति । ४ । ४ । ३२ ।

वह्राण्युक्षति वाह्निकः ॥

रक्षति । ४ । ४ । ३२ ॥

समाजं रक्षति सामाजिकः ।

शब्दर्दुरं करोति । ४ । ४ । ३४ ॥

शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः ।

धर्मं चरति । ४ । ४ । ४१ ॥

धार्म्मिकः । अधार्म्माच्चेति वक्तव्यम् । आधर्म्मिकः ।

शिल्पम् । ४ । ४ । ५५ ॥

चटज्झटादनं शिल्पमस्य चाटिकः ।

प्रहरणम् । ४ । ४ । ५७ ॥

असिः प्रहरणमस्य आसिकः । धानुष्कः ।

शीलम् । ४ । ४ । ६१ ॥

अपूपभक्षणं शीलमस्य आपूपिकः ।

निकटे वसति । ४ । ४ । ७३ ॥

नैकटिको भिक्षुकः । इति ठगधिकारः ।

प्रागधितद्धितात् । ४ । ४ । ७५ ॥

तस्मै हितमित्यतः प्राग यदधिक्रियते ।

तद्वहति रथयुगप्रासङ्गम् । ४ । ४ । ७७ ॥

रथं वहति रथ्यः । युग्यः । प्रासङ्ग्यः ।

धुरो यड्ढकौ । ४ । ४ । ७७ ॥

धुर्यः । धौरेयः ।

नौवयोधर्मविषमूलमूल्यशीतातुल्याश्य-
ल्यायतुल्यप्राप्यवध्यानाय्यसमसंमितसंसितेषु ।
४ । ४ । ९१ ॥

नावा तायम् । नाव्यम् । जलम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यः विष्यः । मूलेन आनाय्यं मूल्यम् । मूलेन समो मूल्यः । सीतया संमितं सीत्यं चेतसम् । तुलया संमितं तुल्यम् ।

तत्र साधुः । ४ । ४ । ९८ ॥

सभासङ् साधुः । सभ्यः । कर्मण्यः । शरण्यः ।

सभाया यः । ४ । ४ । १०५ ॥

सभ्यः ॥

॥ इति यतो ऽवधिः ॥

प्राक्कीताच्छः । ५ । १ । १ ॥

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ।

उदवादिभ्यो यत् । ५ । १ । २ ॥

उवर्णान्ताद्गवादिभ्यश्च यत् । छस्यापवादः । शङ्क्यं दारु । गव्यम् ।

नाभिनभ्राड्नभ्राण्नपान्नवेदस्नसः ।

तत्रैषां क्षितम् । ५ । १ । ५ ॥

वत्सेभ्यो हितो वत्सीयो गोधुक् ॥

शरीरावयवाद्यत् । ५ । १ । ६ ॥

दन्त्यम् । कण्ठ्यम् । नख्यम् ॥

आत्मनविश्वजनभोगोत्तरपदात् खः ।

५ । २ । ६ ॥

आत्माध्यानौ खे । ६ । ४ । १६६ ॥

एतौ खे प्रकृत्यास्तः आत्मने हितं आत्मनीनम् । विश्वजनीनम् । आत्मभोगीत्यः ॥

॥ इति छयतोः पूर्णोऽवधिः ॥

प्राग्वहतेष्ठञ् । ५ । १ । १८ ॥

तेन तुल्यमित्यतः प्राक् ठञधिक्रियते ।

तेन क्रीतम् । ५ । १ । ४२ ॥

क्रमत्वा क्रीतं सांग्रामिकम् । प्रास्थिकम् ।

तस्येश्वरः । ५ । १ । ४२ ॥

सर्वभूमिपृथिवीभ्यामणञौ सः । अनुग्रामिकादीनाञ्च सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।

पंक्तिविंशतित्रिंशच्चत्वारिंशत्यञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । ५ । १ । ५९ ॥

एवे रूढ्यर्था निपात्यन्ते ।

तदर्हति । ५ । १ । ६३ ॥

श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ।

दण्डादिभ्यो यः । ५ । १ । ६६ ॥

एभ्यो यः । दण्डमर्हति । दण्ड्यः । अर्घ्यः । वध्यः ॥

तेन निर्वृत्तम् । ५ । १ । ७९ ॥

अङ्का निर्वृत्तं । आङ्किकम् ।

॥ इति ठञोऽवधिः ॥

तेन तुल्यं क्रिया चेद्वतिः । ५ । १ । ११५ ॥

ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते । क्रिया

चैत्किम् । चुत्वतुल्ये वा वृत् । पुच्छेण तुल्यः पुच्छलः ।

तत्र तस्येव । ५ । १ । ११५ ॥

मधुराद्यामिव मधुरादवत् । स्तुघ्ने प्राकारः ॥ चैतस्येव चैतवन्नैतस्य गावः ॥

तस्य भावस्त्वतलौ । ५ । १ । ११९ ॥

प्रकृतिजन्यबोधे प्रकारोवा । गोर्भावः गोत्वम् । त्वान्तं क्लीबम् ॥

आ अत्वात् । ५ । १ । १२० ॥

तस्येत्यस्य इत्यतः प्राक् त्वतलावधिर्भियते । अपवादैः सहसमावेशार्थमिदम् । चकारो नञ्स्नञ्-भ्यामपि समावेशार्थः । स्त्रिया भावः स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पौंस्नम् । पुंस्त्वम् । पुंस्ता ॥

पृथादिभ्य इमनिज्वा । ५ । १ । १२२ ॥

वा वचनमथादिसमावेशार्थम् ।

र ऋतो हलादेर्लघोः । ६ । ४ । १६१ ॥

इष्टैमेयस्सु ॥

टेः । ६ । ४ । १५५ ॥

टेर्लोप ढूढेरेयस्तु । एयुस्तदुभयवाग्रहढयरिहढा-
नामेव रत्वल् एयोर्भावः । मधिमा । पार्थवम् ।
नदिला । लार्दवम् ॥

वर्णदृढादिभ्यः ष्यञ् च । ५ । १ । १२३ ॥

चादिलनिच् । शौक्लयम् । शुक्लिमा । दार्ढ्यम् ।
दृढिमा ।

गुणवचनब्राह्मणादिभ्यः कर्मणि च ।
५ । १ । १२४ ॥

चाज्जातौ । जडस्य भावः कर्म वा जाड्यम् ।
कौट्यम् । ब्राह्मण्यम् । जातिगणोऽयम् ।

सख्युर्यः । ५ । १ । १२५ ॥

सख्यम् ।

कपिज्ञात्योर्ढक् । ५ । १ । १२७ ॥

कापेयम् । ज्ञातेयम् ॥

पत्यन्तपुरोहितादिभ्यो यक् । ५ । १ ॥
१२८ ॥

सैनापत्यम् । पौरोहित्यम् ।

॥ इति नञ्स्नञोरधिकारः ॥

धान्यानां भवने क्षेत्रे खञ् । ५ । २ । १ ॥

शुद्गानां भवनं क्षेत्रं सौद्गीनम् ।

श्रीहिशाल्याद्ढक् । ५ । २ । २ ॥

व्रैहेयम् । शालेयम् ।

हैयङ्गवीनं संज्ञायाम् । ५ । २ । २३ ॥

नवनीते निपातितोऽयम् ।

तदस्य संजातं तारकादिभ्य इतच् । ५ ।

२ । ३६ ॥

तारकाः संजाता अस्य तारकितम् । नभः ।

पण्डितः । बालतिगणोऽयम् ।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः । ५ । २ । ३७ ॥

अरू प्रमाणमस्य अरुद्वयसम् । अरुद्घ्नम् ।

अरुमात्रम् ।

यत्तदेतेभ्यः परिमाणे वतुप् । ५ । २ । ३९ ॥

यत्परिमाणमस्य । यावान् । तावान् । एता-

वान् ।

संख्याया अवयवे तयप् । ५ । २ । ४२ ॥

पञ्चावयवा अस्य पञ्चतयम् ।

द्वित्रिभ्यां तयस्यायज्वा । ५ । २ । ४३ ॥

द्वयस् । द्वितयस् । तयस् । त्रितयस् ।

उभादुदात्तो नित्यम् । ५ । २ । ४४ ॥

उभयस् ।

तस्य पूरणे डट् । ५ । २ । ४८ ॥

एकादशानां पूरणः । एकादशः ।

नान्तादसंख्यादेर्मट् । ५ । २ । ४९ ॥

षडागमः । षष्णां पूरणः षष्ठमः । नान्तात् किम् । विंशः ।

ति विंशतेर्डिति । ६ । ४ । १४२ ॥

विंशतेर्लस्य ति शब्दस्य लोपो डिति परे । विंशः ।

असंख्यादेः किम् । एकादशः ।

षट् कतिकतिपयचतुरां थुक् । ५ । २ । ५१ ॥

डटि । षष्णां पूरणः षष्ठः । कतिथः । कतिपय शब्दस्य अत एव डट् । कतिपयथः । चतुर्थः ।

द्वे तीयः । ५ । २ । ५५ ॥

डटोऽपवादः । द्वयोः पूरणः द्वितीयः ।

त्रेः संप्रसारणं च । ५ । २ । ५५ ॥

तृतीयः ।

श्रोत्रियंश्छन्दोऽधीते ॥ सू । २ । ८६ ॥

श्रोत्रियः । वेत्यनुवृत्तेश्छान्दसः ।

पूर्वादिनिः । सू । २ । ८६ ॥

पूर्वं ज्ञातमनेन पूर्वी ।

समूर्वाच्च । सू । २ । ८७ ॥

कृतपूर्वी ।

इष्टादिभ्यश्च । सू । २ । ८८ ॥

इष्टमनेन इष्टी । यष्टी ।

तदस्यास्त्यस्मिन्निति मतुप् । सू । २ । ८९ ॥

गावोऽस्यास्त्विन्ना सन्ति गोमान् ।

तस्यै तत्सर्वे । १ । ४ । १९ ॥

तान्तसान्तौ असंज्ञौ स्तौसत्वर्थे प्रत्यये । सज्-
प्रसारणम् । विद्युत्वान् ।

गुणवचनेभ्यो मतुपो लुगिष्टः । द्युक्तो गुणो-
ऽस्यास्तीति द्युक्तः । पटः । क्षणः ।

प्राणिस्थादातो लजन्यतरस्याम् । सू । २ ।

चूड़ालः । चूड़ावान् । प्राणिस्थात् लिज् घिस्ला-
घान् दीपः । प्राण्यङ्गादेव । नेह । मेघावान् ।

लोमादिपामादिपिच्छादिभ्यः श्नेलचः ।
५ । २ । १०० ॥

लोमादिभ्यः घः । लोमशः । लोमवान् । पामा-
दिभ्यो नः । पामनः ।

अङ्गात् कल्याणे । अङ्गना ।

लक्ष्म्या अञ्च । लक्ष्मणः । पिच्छादिभ्य इलच् ।
पिच्छिलः । पिच्छवान् ।

दन्त उन्नत उरच् । ५ । २ । १०१ ॥

उन्नता दन्ता अस्य दन्तुरः ।

केशाद्वोऽन्यतरस्याम् । ५ । २ । १०८ ॥

केशवः । केशवान् ।

अन्येभ्योऽपि दृश्यते । अक्षिवः ।

अर्शआदिभ्योऽच । अर्शवः ।

अत इनिठनौ । ५ । २ । ११५ ॥

दण्डी । दण्डिकः ।

व्रीह्यादिभ्यश्च । ५ । २ । ११६ ॥

व्रीही । व्रीहिकः ।

अस्मायामेधास्रजो विनिः । ५।२।१२१॥

यशस्वी । यशस्वान् । मायावी । मेधावी । स्रग्वी ।

वाचोग्मिनिः । ५ । २ । १२८ ॥

वाग्मी ।

अर्श आदिभ्योऽच् । ५ । २ । १२७ ॥

अर्शस: । आकृतिगणोऽयम् ।

इति मत्वर्थीयाः ॥

प्राग्दिशो विभक्तिः । ५ । ३ । १ ॥

दिक् शब्देभ्य एत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः । अथ स्वार्थिकाः ।

किं सर्वनामबहुभ्योऽद्व्यादिभ्यः ।५।३।२॥

किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ।

पञ्चम्यास्तसिल् । ५ । ३ । ७ ॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ।

कु तिहोः । ७ । २ । १०४ ॥

किमः क्षेपे । किमः क्षेपे चादौ च विभक्तौ । कुतः । कस्मात् ।

इदमो दः सोः । ५ । ३ । ३ ॥

आग्निद्यवीये । इतः ।

एतदोऽत् । ५ । ३ । ५ ॥

आग्निद्यवीये । अनेकालत्वात् सर्वादेशः । अतः । अस्मात् । यतः । ततः । यज्ञतः । इदमोऽस्तु । अस्मात् ।

पर्यभिभ्याञ्च । ५ । ३ । ८ ॥

तस्मिन् । परितः सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ।

सप्तम्यास्त्रल् । ५ । ३ । १० ॥

कुत्र । यत्र । यज्ञत्र ।

इदमोऽहः । ५ । ३ । ११ ॥

त्रलोऽपवादः । इह ।

किमो डत् । ५ । ३ । १२ ॥

वा स्यात् ।

काति । ७ । २ । १०५ ॥

किमः । का । कुत्र ॥

इतराभ्योऽपि दृश्यन्ते । ५ । ३ । १३ ॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तस्तिलादयो दृश्यन्ते । हर्यिग्रहणाङ्गवदादियोग एव । स अवान् । ततो अवान् । तत्र अवान् । ततो अवन्तस् । तत्र अवन्तस् । एवं दीर्घायुः । देवानां प्रियः । आयुष्मान् ।

सर्वैकान्य किंयत्तदः काले दा । ५ । ३ ।

१५ ॥

सप्तम्यन्तेभ्यः कालार्थे दा स्यात् ।

सर्वस्य सोऽन्यतरस्यां हि । ५ । ३ । १६ ॥

दादौ प्राग्दिशीये सर्वस्य सौ वा । सर्वस्मिन् काले सदा सर्वदा । चन्दा । कदा । यदा । तदा । काले किस् । सर्वत्र देशे ।

इदमोर्हिल् । ५ । ३ । १७ ॥

सप्तम्यन्तात् ।

एतेतौ रथोः । ५ । ३ । १८ ॥

इदम् एत इत् एतौ सोरेफादौ याकारादौ च प्राग्दिशीये परे । अस्मिन् काले एतर्हि । काले किस् । इह देशे ।

अनद्यतने हिलन्यतरस्याम् । ५ । ३ । २१ ॥

कर्हि कदा । यर्हि यदा । तर्हि तदा ।

एतदः । ५ । ३ । ५ ॥

एत इत् एतौ स्तोरेषादौ यादौ च प्राग्दिशीये ।

एतस्मिन् काले एतर्हि ॥

प्रकारवचने थाल् । ५ । ३ । २३ ॥

प्रकारवृत्तिभ्यः किमादिभ्यः थाल् । तेन प्रकारेण तथा ॥

इदमस्थमुः । ५ । ३ । २४ ॥

थालोऽपवादः एतदोऽपि वाच्यः । अनेन एतेन प्रकारेण वा इत्थम् ।

किमश्च । ५ । ३ । २५ ॥

केन प्रकारेण कथम् ।

॥ इति प्राग्दिशीयाः ॥

अतिशायने तमबिष्ठनौ । ५ । ३ । ५५ ॥

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः ॥ अयमेषामतिशयेनाढ्यः । आढ्यतमः । लघुतमो लघिष्ठः ॥

तिङश्च । ५ । ३ । ५६ ॥

तिङन्तादतिशये द्योत्ये तमप् स्यात् ॥

तरप्तमपौ वः । १ । १ । २२ ॥

किमेत्तिङव्ययघाद्वाम्बद्रव्यप्रकर्षे । ५ । ४ ।
११ ॥

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्ता द्राङ्ख्-
स्यात् । नतु द्रव्यप्रकर्षे । किन्तराम् । पचतितराम् ।
च्चै स्तराम् । द्रव्यप्रकर्षे तु ॥ उच्चै स्तरः ॥

द्विवचनविभज्योपपदेतरतरीयसुनौ । ५ ।
३ । ५७ ॥

द्वयोरेकस्यातिशये विभज्ये चोपपदे सुप्तिङन्ता-
देतौ स्तः । पूर्वयोरपवादः । पचतितराम् । पचतितमाम् ।
लघुः । लघुतरः । लघीयान् ॥ उदीच्याः प्राच्येभ्यः ।
पटुतराः । पटीयांसः ॥

प्रशस्यस्य श्रः । ५ । ३ । ६० ॥

वृद्धेयसोः परतः ॥

प्रकृत्यैकाच् । ६ । ४ । १६३ ॥

इष्ठादावेकाच् प्रकृत्या स्यात् । श्रेष्ठः । श्रेयान् ।

जरा च । ५ । ३ । ६१ ॥

प्रशस्यस्य ज्यादेश इष्ठेयसोः । ज्येष्ठः ॥

जरादादीयसः । ६ । ४ । १६० ॥

आदेः परस्य । ज्यायान् ।

बह्वोर्लोपोभू च बहोः ।६।४। १५८ ॥

बह्वोः परयोरिमेयसोर्लोपः स्यात् बह्वोश्च भूरादेशः । भूमा ।

इष्ठस्य यिट् च । ६ । ४ । १५९ ॥

बह्वोः परस्य इष्ठस्य लोपः स्याद्यिड़ागमश्च । भूयिष्ठः ।

विन्मतोर्लुक् । ५ । ४ । ३ । ६५ ॥

इष्ठेयसोः । अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् । त्वचिष्ठ । त्वचीयान् ।

ईषदसमाप्तौ कल्पदेश्यदेशीयरः । ५ । ४ । ६७ ॥

ईषदूनोविद्वान् विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । पचति । कल्पम् ॥

विभाषा सुपोबहुच् पुरस्तात्तु ।५।३।६८॥

इषद्दूनः । पटुः । वज्रपटुः । पटुकल्पः । सुपः किम् पचतिकल्पम् ।

प्राग्दिवादृकः । धू । ३ । ७० ॥

इवे प्रतिकृतावित्यतः प्राक् काधिकारः ।

अव्ययसर्वनाम्नामकच् प्राक् ठेः । धू । ३ । ७१ ॥

कामचारः ॥

अज्ञाते । धू । ३ । ७२ ॥

कश्चायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वकैः ॥

कुत्सिते । धू । ३ । ७३ ॥

कुत्सितोऽश्वोऽश्वकः ॥

किं यत्तदोनिर्धारणे द्वयोरेकस्य डतरच् ॥ धू । ३ । ९२ ॥

अनयोः कतरो वैष्णवः । यतरः । ततरः ।

वा बहूनां जातिपरिप्रश्ने डतमच् । धू । ३ । ९३ ॥

जातिपरिप्रश्ने किमिति प्रत्याख्यातमाकरे । कतमो

अवतां कठः। वतसः। ततसः। वा ग्रहणमकञ्-र्थेन्। यकः। स्वकः॥

॥ इति प्राग्दिशीयाः॥

॥ द्वे प्रतिक्लौ ॥ ५ ॥ ३ ॥ ६६ ॥

कन् स्यात्। अश्व इव प्रतिकृतिः। अश्वकः।

सर्वप्रातिपदिकेभ्यः स्वार्थे कल्। अश्वकः॥

॥ तत्प्रकृतवचने मयट् ॥ ५ ॥ ४।२१ ॥

प्राचुर्येण प्रस्तुतं प्रकृतन्तस्य वचनं प्रतिपादनम्। भावे अधिकरणे वा ल्युट्। आद्ये प्रकृतमयमन्नमयम्। अपूपमयम्। द्वितीये तु। अन्नमयो यज्ञः। अपूपमयं पर्व॥

॥ प्रज्ञादिभ्यश्च ॥ ५ ॥ ४ ॥ ३८ ॥

अण् स्यात्। प्रज्ञ एव प्राज्ञः। दैवतः।

॥ लुबविशेषे ॥ ५ ॥ ४ ॥ ४२ ॥

वञ्चनि ददाति वञ्चयः। अलमयः। आद्यादिभ्यस्त्रिरूपसंख्यानम्। आद्यौ। आदितः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आकृतिगणोऽयम्। स्वरेण स्वरतः। वर्णतः॥

क्नुस्तिसुयोगे संपदा कर्त्तरि क्विः ।५।४।५०॥

अस्मृतत्तद्भाव इति वक्तव्यम् । विकारापत्तिं प्राप्नुवत्यां प्रकृतौ वर्त्तमानादिकारशब्दात् स्वार्थे क्विर्वा स्यात् करोत्यादिभिर्योगे ।

अस्य च्वौ ॥ ७ ॥ ४ ॥ २२ ॥

अवर्णस्य ईत् स्याच्च्वौ । अकृष्णः कृष्णः सम्पद्यते । तत्करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गी-स्यात् ।

अव्ययस्य च्वावीत्वं नेति वाच्यम् । दोषाम्भूतमहः । दिवाम्भूता रात्रिः ।

विभाषा साति कार्त्स्न्ये ॥५॥४॥५२॥

क्विविषये सातिर्वा स्यात् साकल्ये ॥

सात्पदाद्योः ॥ ८ ॥ ३ ॥ १११ ॥

सस्य षत्वं न । दधि सिञ्चति । कृत्स्नं भस्मसात्करोति । सम्पद्यतेऽग्निसाद्भवति ।

च्वौ च ॥ ७ ॥ ४ ॥ २६ ॥

दीर्घः स्यात् । अग्नीभवति ।

अव्ययानुकरणाद्द्वजवराद्भादृति तौ

क्वाच । ५ । ४ । ५७ ॥

ह्रस्वतरं न्यूनं ततु ततो न्यूनं बनेकाजिति यावत्ताद्दशलर्थे यस्य तस्मात् ड़ाच् स्यात् कब्बस्तिभियोगे ॥

डाचि बहुलं हे भवतः । इति डाचि विवक्षिते द्वित्वम् ॥

नित्यमाम्रेड़िते ड़ाचीति वक्तव्यम् । डाच् परं यदाम्रेड़ितं तस्मिन्परे पूर्वपरयोर्वर्णयोः परस्य लोपात् । इति तकारपकारयोः पकारः । पटपटाकरोति । अव्यक्तानुकरणात् किम् । दृषत्करोति । द्रवतरा-र्थात् किम् । द्रुतकरोति । अवरैति किम् । खरटखर-टाकरोति । अनितौ किम् । पटिति करोति ॥

॥ इति तद्धिताः ॥

॥ अथ स्त्रीप्रत्ययाः ॥

अजाद्यतष्टाप् । ४ । १ । ४ ॥

अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् । अजा । एड़का । अश्वा । चटका । अविका । बाला ॥ वत्सा । घोट्टा । नन्दा । विलाता । मेधा । इत्यादि । गङ्गा । सर्वा ॥

ङिति च । ४ । १ । ६ ॥

ङिन्निमित्तात् प्रातिपदिकात् ङीप्। अनन्ती पचन्ती ॥

टिड्ढाणञ् द्वयसज्दघ्नञ्मात्रच्-
तयप्ठक् ठञ्कञ् क्वरप् । ४ । १ । १५ ॥

अनुपसर्जनं वट्टिदादि तदन्तं यद्दन्तं ततः स्त्रियां ङीप्। कुरुचरी। नद्दट्। नद्दी। देवट्। देवी। सौपर्णेयी। ऐन्द्री। यौत्सी। अतद्वयसी। अदद्भी। अदंलाती। मद्भतयी। आच्चिकी। प्राच्यिकी। लावणिकी। याद्दशी॥ द्वित्वरी।

बह्वल्पार्थाच्छस्कारकादनुपसंख्यानम्।

क्षैयी। पैंक्षी। घात्तिकी। आढ्यङ्करणी। तक्षणी। तक्षुणी॥

यञञ्च । ४ । १ । १६ ॥

यञन्तात् ङीप्। अकारलोपे कृते।

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् । ६ । १ । ६८ ॥

हलः परस्य तद्धितयकारस्य लोप इति परे।

कार्यी ॥

प्राचां ष्फस्तद्धितः । ४ । १ । १७ ॥

यञन्तात् ष्फो वा स्त्र च स्यात् तद्धितः ।

षिद्गौरादिभ्यश्च । ४ । १ । ४१ ॥

ङीष् स्यात् । गार्गियणी । नन्तकी । गौरी ।

अनड्वही । अनड्वाही । आकृतिगणोऽयम् ।

वयसि प्रथमे । ४ । १ । २० ॥

प्रथमवयोवाचिनोऽदन्तात् ङीप् । कुमारी ।

द्विगोः ॥ ४ । १ । २१ ॥

अदन्ताद्द्विगोर्ङीप् । त्रिलोकी । अजादित्वा-

त्टिलोपः । त्रयनीका ।

वर्णादनुदात्तात्तोपधात्तो नः । ४ । १ । ३९ ॥

वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्ज-

नाद्वा ङीप् तकारस्य नः । एता । एनी । रोहिता ।

रोहिणी ।

वोतोगुणवचनात् । ४ । १ । ४४ ॥

उदन्ताद्गुणवाचिनो वा ङीप् । मृद्वी । मृदुः ।

वृद्धिकादिभ्यश्च । ४ । १ । ४५ ॥

वा ङीप् । वृद्धी । वृद्धः ।

कादिकारादक्तिनः । रात्री । रात्रिः ।

सर्वतोऽक्तिन्नर्यादित्येके । शक्टी । शक्टिः ॥

पुंयोगादाख्यायाम् । ४ । १ । ४८ ॥

या प्रसाख्या पुंयोगात् स्त्रियां वर्त्तते ततोङीप् ।
गोपस्य स्त्री गोपी ।

बालकान्नान्न । गोपालिका । सखपालिका ।

प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः ।

७ । ३ । ४४ ॥

प्रत्ययस्थात् कात् पूर्व्वस्याकारस्येकारः स्यात् आपि
स चाप् सुपः परो न चेत् । सर्व्विका । कारिका ।
अतः किम् । नौका । प्रत्ययस्थात् किम् । शक्नो-
तीति शक्का । असुपः किम् । वज्रपरिवालका नगरी ।

सूर्य्यादेवतायां चाप् । सूर्य्यस्य स्त्री देवता सूर्य्या ।
देवतायां किम् ।

सूर्य्यागस्त्ययोश्चेचङ्यौ च यलोपः ॥ सूरी ।
सुन्नी ॥

इङ्श्वलणभवशूर्वलङ्मृड़ृहिसारण्य-
यवयवनमातुलाचार्याणामानुक् । ४ ।१।
४९ ॥

ङीष् च । इन्द्रस्य स्त्री इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ॥

हिमारण्ययोर्महत्त्वे । महद्धिमं हिमानी । महदरण्यं अरण्यानी ॥

यवाद्दोषे । दुष्टो यवो यवानी ॥

यवनाल्लिप्याम् । यवनानां लिपिर्यवनानी ॥

मातुलोपाध्याययोरानुक् वा । मातुलानी । मातुली । उपाध्यायानी । उपाध्यायी ।

आचार्यादणत्वञ्च । आचार्यानी ।

अर्यक्षत्रियाभ्यां वा स्वार्थे । अर्याणी । अर्या । क्षत्रियाणी । क्षत्रिया ।

क्रीतात् करणपूर्वात् । ४ । १ । ५० ॥

क्रीष् । वस्त्रक्रीती । क्वचिन्न । धनक्रीता ।

स्वाङ्गाच्चोपसर्जनाद्संयोगोपधात् ।

४ । १ । ५४ ॥

असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्तान्ङीष् वा । केशाद्यतिक्रान्ता अतिकेशी । अतिकेशा । चन्द्रमुखी । चन्द्रमुखा । असंयोगोपधात् किम् । सुगुल्फा । उपसर्जनात् किम् । सुग्रिवा ॥

ऋ क्रोडादिभ्यश्च । ४ । १ । ९६ ॥

क्रीडादेर्गणाच्च स्वाङ्गान्ङीप् । कल्याण्यै क्रीड्या । क्रीडा । जातिगणोऽयम् । सुजघना ॥

नडादिभ्यः ॥

नडादीनात् सञ्ज्ञायाम् । ४ । १ । ९८ ॥

नडादिभ्यः ॥

पूर्वपदात् सञ्ज्ञायामगः । ४ । १ । ९९ ॥

पूर्वपदस्यान्निमित्तात् परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने । शूर्पणखा । गौरसुखा । संज्ञायां किम् । तान्नसुखी कन्या ।

जातेरस्त्रीविषयादयोपधात् । ४ । १ । ६३ ॥

जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततो ङीष् । नटी । वृषली । कटी । वह्वृची । जातेः किम् । सुण्डा । अस्त्रीविषयात् किम् । बलाका । अयोपधात् किम् । शक्तिका ॥

योपधप्रतिषेधे गवय हय सुकय मत्स्यमनुष्याणाम् प्रतिषेधः । गवयी । हयी । सुकयी । हलन्तज्ञितेति यलोपः । मनुषी ॥ मत्स्यस्य ङ्यां यलोपः । मत्सी ॥

इतो मनुष्यजातेः । ४ । १ । ६५ ॥

ङीप् । ङाप्ङी ॥

जङुतः । ४ । १ । ६६ ॥

जङन्ताद्द्योपधान्मनुष्यजातिवाचिनः स्त्रियाम् ङ्यां स्तः ॥ कुरुः ॥ अध्वर्युब्राह्मणी ।

पङ्गोश्च । पङ्गूः ।

श्वशुरस्योकाराकारलोपश्च । श्वश्रूः ॥

उरुत्तरपदादौपम्ये । ४ । १ । ६६ ॥

उपमानवाचिपूर्वपदमूरुत्तरपदं यत्प्रातिपदिकन्तस्माद्ङ् । करभोरूः ।

संहितशफलक्षणवामादेश्च । ४ । १ । ७० ॥

अनौपम्यार्थं सूत्रम् । संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ॥

शार्ङ्गरवाद्यञो ङीन् । ४ । १ । ७३ ॥

शार्ङ्गरवादेर्यञोऽकारान्तादन्नाच्च जातिवाचिनो ङीन् शार्ङ्गरवी । वैदी । ब्राह्मणी ।

नृनरयोर्वृद्धिश्च । नारी ।

युवन्स्तिः । ४ । १ । ७७ ॥

युवन् शब्दात् स्त्रियां तिः स्यात् । युवतिः ।

॥ इति स्त्रीप्रत्ययाः ॥

ग्रन्थान्तरे प्रविष्टानां बालानामुपकारिका ।
कृता वरदराजेन लघुसिद्धान्तकौमुदी ॥ १ ॥

इति श्रीवरदराजकृता लघुसिद्धान्तकौमुदी समाप्ता ॥

॥ इति लघुकौमुदी समाप्ता ॥

कलिकाता राजधान्यां श्रीयुतबाबुभुवनचन्द्रबसाक-
द्वारा देवनागराक्षरे मुद्रितानि ।
निमतला घाट ष्ट्रीट नं ८ ।

वैद्यशास्त्र, मुक्तावलि ॥) परिभाषाप्रदीप ॥) सटीक द्रव्यगुण १) शारङ्गधर १) चरकसंहिता १म खण्ड इदूते ८म पर्य्यन्त सटीक ५) वाभटसूत्रस्थान १) निदान सटीक ३) भैषज्यरत्नावलि सम्पूर्ण ५) सुश्रुत सम्पूर्ण ४) प्रयोगचिन्तामणि १म खण्ड ॥) लोलिम्बराज सटीक १) ।

सांख्य, सांख्यतत्त्वकौमुदी ॥) ज्योतिष्, सूर्य्यसिद्धान्त १॥) न्याय, खण्डनखण्डखाद्य २) शब्दशक्तिप्रकाशिका १) तत्त्वचिन्तामणि =) भाषापरिच्छेद । =) कुसुमाञ्जलि ।) तोत्त्वपस्कार । =) ।

छन्दःशास्त्र, छन्दोमञ्जरी ॥) पिङ्गल सटीक १॥) अलङ्कार, साहित्यदर्पण २) चन्द्रालोक =) धर्म्मशास्त्र, सटीक सन्ध्यापञ्चरत्न ।) नित्यकर्म्मपद्धति =) खग्धरास्तोत्र =) अघानुस्मृति —) ।

काव्य, शिशुपालवध १म खण्ड १) किरातार्জ্জुनीय सटीक १॥) मूलमात्र ।) रघुवंश २) मेघदूत ।) ॥) मेघदूत सटीक । =) नलोदय सटीक । =) ऋतुसंहार सटीक । =) रत्नपञ्चक —) सूर्य्यशतक —) ।